Related to the above is the personality of the Deity as Dikshitar presents it in his *kriti*-s. In Hindu meditation, in *Japa* and *Dhyana*, the form of the personal God is evoked in the mind with a preliminary verse describing that form. This is called the *Dhyana-sloka*. The *Mantra-Sastra*-s prescribe the forms of the Deities to be contemplated, the posture (*Asana*), the expression on the face and *chinmudra*, the gesture of assurance (*Abhaya*) and the various kinds of weapons (*Astra*) held in the hands, the accompanying Goddess(es), attendants etc. Dikshitar was an adept in the *Mantra Sastra*, and his *Sahitya* embodies correctly all the details of the particular Deity in the song; when the melodic setting conditions the devotee's mind to the requisite mood of serenity and inwardness, the phrases and epithets that unfold in the flowing lines conjure in the mind the personality of the Deity. I have checked Dikshitar's descriptions of the Deity-forms in the songs on different forms of Ganesa; Mahaganapati in Todi, Panchamatangamukha in Malahari; Hastivadanaya in Navaroz. The iconography set forth is remarkable for its accuracy and conformity to *Mantra Sastra* and *Silpa Sastra*. This can be seen in a conspicuous manner in the *kriti*-s on the Planets. *Mamava Pattabhirama* is not just the whole beauty and incarnation of the *raga* Manirangu; the portrait of Rama in State (*Pattabhirama*) that is drawn here and that is instilled in the listener's mind is authentic, and in conformity with the texts on Rama-worship. The Deity Rajagopala at Mannargudi, the subject of Dikshitar's songs in Saveri (*Sri Rajagopala*) and the rare Jaganmohana (*Srividya-Rajagopalam*), is one of the most beautiful of our icons; appearing with a smile, like a very living presence. It owes its execution to a master craftsman acquainted with the esoteric *Mantra Sastra* behind it. The image is a masculine and feminine figure in one, representing Krishna and Devi as a composite Deity—but differently from the way Ardhanariswara-Siva is represented. It is, therefore, called *Srividya-Rajagopala*. Dikshitar describes the image as having feminine features and ornaments (*Nariveshadhara-vamabhaga*). This composite form of Srividya-Rajagopala is to be worshipped by those who desire the effortless and mellifluous flow of the muse of poesy and music. For a more detailed treatment of this aspect, the student's attention is invited to my paper 'Sri Muttuswami Dikshitar', *Journal of the Music Academy*, Madras, XXVI, (pp. 131-47).

The nature and the style of presentation of the contents of Dikshitar's songs, therefore, differ fundamentally from those of the

[1] *Kalki Dipavali Number*, 1966, pp. 65-68.

most prominent composer with whom we are most familiar, namely Tyagaraja. Obviously, Dikshitar who was wedded to voluntary poverty as an ideal of life, had to pass harder times than his contemporary. But Dikshitar believed that all the resultant internal conflict and emotional ferment ought to be digested in the fire of *vairagya* or in the transcending of the passions resulting from *rajoguna*, and in firm devotion to and faith in the Almighty. The songs were not a medium for giving vent to emotions. Consequently, instead of being colourful with varied *bhava*-s, and *rasa*-s, Dikshitar's *kriti*-s, are a product of a *sattvika* frame of mind and embody the highest *rasa* of *Santa*, of serenity.

This is not to deny that the *Sahitya*-s of Dikshitar reflect Dikshitar's lofty ideals. Reference was already made to his *vairagya* and his vow not to seek man or indulge in *Narastuti*. His two songs which expressly speak of this have already been cited. In his *Vegavahini*-song, he says that the Goddess of poetry and art removes for one the humiliation of having to wait on the pleasure of degraded men (*Naradhamanana-viloka-sokapaham*).

Dikshitar's long stay at Tiruvarur, where he was born, was due again to his fascination of the esoteric meaning of the concept of the Deity Tyagaraja. Tyagaraja's image and more so His dance are conceived as a symbolic representation of the highest mystic monistic *mantra* affirming the oneness of the individual and Supreme Soul expressed in the formula (*A*)*hamsah*, (*I am He*), also called the *Hamsa* and *Ajapa mantra*. This has to be understood if one wants to follow the many references in the numerous Tyagaraja *kriti*-s of Dikshitar. The *Ajapa*, meaning 'with no repetition of word', is the silent contemplation of the unity of the individual spirit with the Supreme One; the inner soul lies like a child in the net-hammock of the life-breath of the mundane body in which it nestles in involuntary and ceaseless rhythm, the blissful swing of rise and fall. This is the *Ajapa-natana* or *Hamsa-natana* whose truth the Yogins know, *Yogi-vidita-ajapa natana-rangam*, as Dikshitar says in his *Tyagaraja pālayasu mam* (Gaula), *Atilalita-hamsa-natana* (Athana, *Tyagarajo virajate*), *Ajapanatanananda-vaibhavam* (Marga Hindola—*Chandrasekharam*) and *Ucchvasa-Ajapa-nata-bharanam* (Natabharana). The Nataraja of Chidambaram is celebrated as the Lord of Dance; but if one desires to enjoy the Dance of Siva, one has to see Tyagaraja in Tiruvarur. It is the music of the *Kahala*-s (long trumpets) and the *Suddhamaddala* and the *tala* (with no other instrument) of this *Hamsa-natana* that is signified by the name Hamsadhvani that Ramaswami Dikshitar gave to his new *raga*; it is this Hamsadhvani that held Dikshitar in Tiruvarur and formed the spiritual tether which drew him back to Tiruvarur in the midst of his pilgrimages abroad; it is to this

Hamsadhvani to which the present writer's epic-poem on Dikshitar's life is tuned.

The word *Tyaga* in the name Tyagaraja recalls the Upanishadic statement that it is by *Tyaga* (giving up) that one attains immortality (*Tyagenaike amrutatvam anasuh*). In Indian thought, the heart is a lotus, *Kamala*; hence is Tiruvarur called Kamalai or Kamalanagara. In the oft-heard opening Navavarana song in Anandabhairavi, Dikshitar invokes Goddess Kamalamba as sporting in the city of the lotus of the heart (*Hrit-kamala-nagara-nivasini*).

All the three great composers of the Karnatic Trinity—incidentally they were all born at Tiruvarur—were of the *Smarta*-tradition which, while believing in the fundamental truth of *Advaita* and *Nirguna-Brahmam*, accepted also the *Saguna-Brahman* as manifested in a number of Deity-forms. These were intended to afford suitable means or supports for worship for men with a diversity of equipment and disposition. This ideology also allows the seeking of one form as more favoured than another, *Ishta-devata*, e.g. Rama for Tyagaraja, Kamakshi for Syama Shastri and Padmanabha for Svati Tirunal. Dikshitar was a true Advaitin and adored in his songs all forms of the Deity with the same degree of devotion. If we have to think of any *Ishta-devata* for Dikshitar, it will be difficult to decide which one it is. Kumara is his Guru; on Ganesa, he had specialistic compositions, nearly twenty-five in number; and then there is Tyagaraja. But at an early age Dikshitar had also received *Diksha* or initiation in the esoteric worship of the Mother Goddess, *Srividya*. An attentive listener may recollect the expression *Chidanandanatha* appearing in some of the *kriti*-s of Dikshitar. beginning with the first that he sang at Tiruttani. This *Chidanandanatha* is the name of Dikshitar as an initiate in *Srividya* (*Diksha-nama*). His *Devi-kirtana*-s are very large in number; there are two series: one on Kamalamba of Tiruvarur and another on Abhayamba of Mayuram for the special *Navavarana*-worship of Devi. These, as well as most of the *Devi-kirtana*-s addressed to the Goddesses worshipped at the different shrines visited by him, are replete with the entire lore and technical ideas of the *Srividya* form of *Sakti* worship. As I have already indicated, he has a whole corpus of compositions on the *Lalitopakhyana*—a text of this school. As more and more *kriti*-s of Dikshitar come to light, more pieces of this corpus are being revealed. Even in the pieces that have come down from the *Sampradaya Pradarsini*, we have many Devi-songs in which are embodied, *en bloc*, the Names of Devi as found in the two canonical hymns of the school, *Lalita Trisati* and *Lalita Sahasra Nama*. So that, as in the case of the *Navagraha-kriti*-s, here we have something which gives in a popular

song-medium, for the benefit of the whole world of believing men and women, what is kept as a secret among the initiated.

The singing of such songs is a double blessing. Dikhitar's songs can be sung during auspicious celebrations and in concerts; *Neraval* can be done by the musician at any passage in his song. There are no passages where the sentiment expresses suffering or mundane significance which would make their singing, playing or *Neraval* either inauspicious or pointless. Wherever you touch or dwell, the glory of God or Goddess is there, and the uplifting Names and Epithets, with the swaying melody, transport you.

Dikshitar's firm faith in God is affirmed by him in a different and straightforward way. In a *Saranga-kriti* on Tyagaraja, he says, "My acts—well-done or ill-done—I dedicate to Tyagaraja, who looks after welfare here and in the hereafter, prosperity here and final salvation". This dedication of everything to the Lord forms also the *pallavi* of another piece, one in Khamas on God Kumara. In a Rudrapriya song on the same Tyagaraja, he says: "I am a devotee of Tyagaraja; therefore even if I am a man of little knowledge, I have known everything (Sarvajna); I have known what really deserves to be known". In the Purvi-song in the Tiruttani-series, he affirms, "I am servant of Guru-Guha, no, I am Guru-Guha himself". There is a whole song in the rare *raga* Purna-Panchama on the One Nameless Abolute, the Brahman of the Upanishads.

In some places Dikshitar mentions the moral and spiritual virtues that qualify one to be a devotee or a person fit to be the abode of God. The Asaveri-*kirtana* on the Moon (in the Planet series) describes the Moon as pure and pleasing like the heart of a good man (*sadhu-hridaya-sadrisam*). God Tyagaraja is described as the royal swan sporting in the heart of the pure (*Athana*). Krishna (*Cetas sri*) sports in hearts which are cool and pleasing. It is to such people that God or Goddess is easy of access (*Sadhujananam atisarale*—Begada on Devi). In a fine short piece in Isamanohari on Ganesa, he says that God is realized in hearts which are free from defects like likes and dislikes and hence are beautiful (*raga-dveshadi-rahita-hridaya-viditam*). Siva shines in hearts that melt like butter. (*Navanita-hridaya-vibhatam* in *Akshaya-Linga vibho*).

God shines in the heart of the wise like a lamp on the tower, (*Matimatam hridaya-gopura-dipah*), which suggests that this is for the help and guidance of the people. This God is not only the witness of all your acts but he is the enjoyer of the good and fine things that you do. To Dikshitar who did not sing to please any

Prince, the God within him was the foremost *Rasika*, connoisseur of things beautiful; (*Rasikapungavaguruguhajananim*—Rasamanjari song, and *Guruguham sangita-priyam bhajeham* in *raga* Gitapriya). The Lord sits in the thousand petalled lotus within, and drinks the nectar of Dikshitar's music (*mamaka-sahasra-kamalasino-madhurya-ganamritapanah*—Srinathadi in Mayamalavagaula).

Although like Tyagaraja, Dikshitar did not write several exclusive pieces on the art of music as *Sadhana* or constituting the ineffable and Supreme Bliss itself, Dikshitar's conception of this high role of music is seen in his *kriti*-s. If Tyagaraja says that Siva or Rama is the embodiment of music (*Nadatanum*; *Nada-sudharasambilanu*), Dikshitar embodies this idea in a number of *kriti*-s. In the song in Ratipriya, (*Mararatipriyam*), he describes God as the embodiment of *Bhava, Raga* and *Tala*; and the Goddess is also described in the same way (*Bhaja re re chitta* and *Abhayamba* in Kalyani and *Panchasatpitha* in Devagandhara). The *kriti* in Vamsavati describes Devi as of the form of the 22 *sruti*-s. The two breasts of the Mother which sustain the universe are sweet music and poetry (*Sarasa-sangita-sahitya-stana-dvayayai*). The Devi-pieces, again and again, speak of Devi as herself playing on or enjoying the music of the vina in particular and of other instruments as well. Devi is pleased with those who know the essence of music and poetry (*Sangita-sahitya-sarajna-sannute*). That is, according to Dikshitar, a composer should be an adept in both fields, the literary and the musical. Similarly, on dance, Dikshitar refers to the many forms of dance promulgated by Nataraja in the last line of his well-known song in Kedara on that Deity at Chidambaram (*Sangita-vadyavinoda-Tandava-jatabahutara-bheda-codyam*). In a Bilahari song on Hatakesvara at Tiruvarur, he speaks of the God there as displaying the art of dance described by authoritative writers on it like Hanuman, Nandin, Adi Bharata etc. (*Maruti-Nandi-Adi-Bharatacharyairāvedita-nartana-sphurte*). In another Tiruvarur song in Rudrapriya, God Tyagaraja is described as being propitiated by various kinds of dance performed by the temple. (*Vimala-rudraganika-nartana-vinodabheda-modakarasya*).

Dikshitar adopted the Sanskrit language as the medium of his works as this was the prevailing practice among the great composers; in the immediate past, he had his own father (to some extent) and the complete Sanskrit composers Narayana Tirtha, Sadasiva Brahmendra, Upanishad Brahmendra and last but not least, Margadarsi Sesha Ayyanar who served as a model for Sri Svati Tirunal. Among his two contemporaries, Syama Sastri wrote in Sanskrit before changing over to Telugu and Tyagaraja had several songs in pure Sanskrit. The Sanskrit medium established the continuity with the classical past, and what is more, provided

the most suitable vehicle for the kind of thought and ideas that Dikshitar had to convey. Sanskrit established here the necessary link with sacred literature, *Veda, Mantra, Tantra, Kshetramahatmya.* It also lent dignity to the diction and proved an aid to the elevating effect of his compositions.

The earlier age of *Gita, Prabandha* etc. was about to disappear, although these forms still lingered in the *Lakshana* and *Lakshya-gita*-s of the different *raga*-s. Ramaswami Dikshitar still composed a *Lakshya-prabandha* for his creation Hamsadhvani. Appearing during this transitional phase, Dikshitar's compositions gave a new direction to *kirtana*-s, along with those of his contemporaries. But a very important point of difference in Dikshitar's *kriti*-s, which distinguishes them from those of others (like Tyagaraja's) is that the *charana*-part was one integral whole and no part of it could be skipped; the musician can sing one *charana* of Tyagaraja's pieces and leave out the rest That is possible because the *charana*-s are in the same setting and can be dispensed with. This is not possible in Dikshitar's *kriti*-s, *Madhyamakala* passages of varying lengths are a regular feature of Dikshitar's *kriti*-s, and give a needed variation, as the prevailing tempo of his compositions is the slow one (*vilambita*); often they alternate with the *vilamabita* passages in all parts of the compositions. Several songs have *svara* passages and also a few have *jati*-s. They have the embellishment of *prasa*-s initial, medial and final, but they do not fall into metrical patterns as songs of composers in the Telugu medium do. They employ the *yatis*-s of *Gopuccha* and *Srotovaha,* decrease and increase, syllable by syllable, a feature seen also in old Devaram music. Examples are: Anandabairavi,—*Tyagaraja-yoga-vaibhavam, Raja-yoga-vaibhavam, Yoga-vaibhavam, Vaibhavam, Bhavam, Vam*; and in the same piece, taking the reverse order, we have the increase, *Sam, Prakasam, Svarupa-prakasam, Tattva-svarupaprakasam, Sakala-tattvasvarupa-prakasam, Siva-Saktyadi-sakala-tattva-svarupa-prakasam.* Concert listeners may recall similar passages in *Maye tvam yahi* and *Sri-Varalakshmi.*

The importance of the compositions of Dikshitar for the theory and evolution of Karnatic music was dealt with above. The *raga*-s are the crux of this matter. Dikshitar's systematic work put Venkatamakhin's scheme of 72 *Mela-janya* scheme on a strong foundation. In the last piece of his series of illustrative compositions of this scheme, Dikshitar mentions expressly the 72 *Raganga-raga*-s Aware of the importance of the subject, Dikshitar took special care to work into the text of the songs and most dexterously, the names of the *raga*-s so that doubts or disputes regarding the *raga*-s of the pieces do not arise in his case as they do in the case of many *kriti*-s of Tyagaraja.

Of the three aspects of music and composition, *bhava*, *raga* and *tala*, the beauty of the last, of rhythm, pace and lilt can be enjoyed in Syama Shastri, *Bhava* is most patent in the lyrical outpourings of Tyagaraja. *Raga* may be said to be Dikshitar's *forte*. This *raga*-importance in Dikshitar may be viewed in more than one aspect. Firstly as a classicist, Dikshitar had a full awareness of the great heritage of the art. It may be seen from the several lists of songs given above under different heads, he brought to life numerous ancient *raga*-s by composing *kriti*-s in them. His *kriti*-s are, therefore, our sole guide now in the rendering of those *raga*-s. In some of the rare *raga*-s, Dikshitar has more than one *kirtana*. Cultivation of his *kriti*-s is, therefore, an enlarging of one's musical equipment and knowledge. The full and correct forms of *raga*-s were formerly determined by different kinds of definitive compositions *gita*, *prabandha*, *thaya* and *alapa*, referred to, together, as *chaturdandi*. Then came the *tana varna*-s and *daru*-s. In course of time, the *pada* or *kirtana* (*kriti*) on one side and *alapa* on the other became, according to the law of survival of the fittest, the two chief media by which *raga*-s were not only expounded and enjoyed, but also technically defined and recognised. Between the *kriti* and *alapa*, the former is the ready and tangible one. For all the ten characteristics of a *raga*-, the *sanchara*-s and *prayoga*-s of master-composers in their *parda*-s or *kirtana*-s became the chief guide. The *kriti*-s of Dikshitar, form, in this respect, our most precious possession. If as *sahitya*-s on different deties, his *kriti*-s are like *dhyana-shloka*-s of the *murti*-s of different forms of Divinity, on the music side they are so many *Lakshana-gita*-s investing the *raga-murti*-s with all the subtleties and graces of the *raga*-s.

The *raga*-s, as named and as sung in the *kriti*-s, give rise to some confusion and controversy, The *raga-lakshana* discussions of the Experts' Committee of the Music Academy, Madras, continued for many years during the Annual Conferences and form the Academy's solid achievement. The detailed reports in the Academy's Journal show that the usages in the *kriti*-s in the same *raga*-s by the two main composers, Tyagaraja and Dikshitar, figured continuously, producing the idea of two schools, as it were, the Tyagaraja school and the Dikshitar school. From this point of view again, the *kriti*-s of Dikshitar are valuable. We may leave aside *raga*-s like Sankarabharana and Bhairavi, Kambhoji and Todi; even in the case of *raga*-s sung less often, although the same notes are used by the two composers, Tyagaraja and Dikshitar, the setting of the Dikshitar *kriti* is such that a different ethos and effect are created. There is then this distinct aesthetic value which we should not deprive ourselves of.

The distinct quality of Dikshitar's music, from the aesthetic point of view, is its style which is derived from the technique of

the vina. In his major Bhairavi *kriti Balagopala*, Dikshitar calls himself a *vainika-gayaka* and this gives the key to an understanding and appreciation of the excellence of Dikshitar's style. In the well-known Gamakakriya song on Minakshi, Dikshitar speaks of the ten *gamaka*-s in the playing of the vina. The richness of *gamaka* in Dikshitar's music, the grace of the *kampa*, the *odukkal-sadukkal*, as they call it in our musical parlance, all this finer quality of his music derives from the vina. Another distinction is the tempo. The full evocation of *raga*-form could come only in the *vilamba-kala*. Because of this *visranti*, the *gamaka*-s and the stately diction of Dikshitar's *kriti*-s produce the impression of a big python, of a state elephant, of a ship on the waters, and of the big temple car of Tyagaraja at Tiruvarur.

Such is the work, such is the high quality of the art of Dikshitar, a scholar and master, a versatile genius. Like the title *vainika-gayaka* that he gave himself, another is in Bauli song, *Pandita-tara*, meaning 'more scholarly than others'. This offers us the key to an understanding of another dimension of Dikshitar's work and art. I have observed that when a musician grows in knowledge and maturity, steadiness and reflectiveness, he begins to develop a greater interest in Dikshitar's *kirtana*-s.

I may conclude with a reference to Sri Aurobindo's exposition of true or great poetry as *mantra*. When you sit and listen to Manirangu and *Mam ava* or Navaroz and *Hasti-vadanaya* or Bauli and *Parvati-Paramesvarau*, you are under the spell of something transcending a mere song.

॥ श्रीः ॥

श्रीमुत्तुस्वामिदीक्षितचरितम्

॥ प्रथमः सर्गः ॥

अपां प्रसादं च धियां प्रसादं
तन्वंस्तनुश्चाप्यतनुर्महिम्ना ।
आस्ते हि मैत्रावरुणिर्महर्षिः
अवागुदग्भारतसंहिताद्रक् ॥ १ ॥

कुम्भादभूद्वारिधिमाचचाम्र
विन्ध्याद्रिमुल्लङ्घयति स्म वृद्धम् ।
निगीर्य रक्षोऽजरयत् स्वकुक्ष्या-
मित्यद्भुतो यत्र रसः प्रकर्षी ॥ २ ॥

आस्ते तदध्याससमिद्धलक्ष्मीः
दिग्दक्षिणा यत्र कवेरकन्या ।
पादाब्जयोर्भारतमातुरद्धा
विद्योतते राजतनूपुरश्रीः ॥ ३ ॥

सुरापगाया इव कल्मषघ्न्यः
आपश्च यस्याः कनकाभिधायाः ।
पुष्णन्ति भूमौ कलमान् रसाढ्यान्
नृणां मतौ वाचि गुणानुदग्रान् ॥ ४ ॥

तदीयशाखाकरपालिकाङ्क-
पालीरसज्ञो निकषा महाब्धिम् ।
बाभाति वेलातिगकीर्तिचोल-
भूपालनामप्रथमानदेशः ॥ ५ ॥

शिल्पोत्तरे देवनिकेतजाते
पदे पदे यत्र समुज्जिहाने ।
वासोत्सुकः स्वीकृतभूरिनाम-
रूपः प्रभुर्भाति हि पक्षपाती ॥ ६ ॥

प्रज्ञातिशायी व्यवहारदक्षः
श्लक्ष्णो रसज्ञश्च सभाङ्गिभाषी ।
प्रसन्नवक्त्रोऽभिजनो यदीयो
विज्ञायते हन्त विलोक एव ॥ ७ ॥

तच्चोलभूमेर्हृदयं विभाति
चोलान्ध्रकादिक्षितिपालधानी ।
तज्ज्ञेति यन्नाम तथा यशस्वि
सङ्गीतमेधादि यदर्थकोट्याम् ॥ ८ ॥

यथाश्रुतोऽहं महतो महीयान्
तज्ज्ञापुरे पश्यतु मामितीव ।
यामावसत्यागमयोनिरीशो
यथार्थनामा बृहदीशदेवः ॥ ९ ॥

दिश्युत्तरस्यां प्रसृते तुरुष्क-
बाधाम्बुवाहे बुधराजहंसाः ।
उड्डीय यन्मण्डलमानसान्त-
र्विद्यास्सुविस्रब्धमवर्धयन् स्वाः ॥ १० ॥

तञ्जापुरीं तां परिवारयत्सु
पुरीवरेष्वग्र्यतमा चकास्ति ।
नामैव यस्याः कमलेति तत्र
व्यनक्ति लक्ष्म्या विविधां समृद्धिम् ॥ ११ ॥

जन्मैव जन्मान्तरबोधि यत्र
करोति जन्तुं यदि शैवमुख्यम् ।
वक्ष्यामि वल्मीकविशेषितस्य
महीस्थलस्यास्य कथं महत्त्वम् ॥ १२ ॥

न कर्मणा न प्रजया धनेन
त्यागेन केऽप्यानशिरेऽमृतत्वम् ।
इत्यागमार्थोद्बलनाय यत्र
त्यागाभिधानेन विभुर्विभाति ॥ १३ ॥

उच्छ्वासनिःश्वासलये यदात्मा
हंसध्वनिं नृत्यति साम गायन् ।
सैवाजपा यत्र हि मन्त्रविद्या
प्रकाश्यते नृत्तमिषेण शम्भोः ॥ १४ ॥

न श्रीमदङ्केन न कौस्तुभेन
न चापि लक्ष्म्या मम वक्ष एतत् ।
पर्याप्तकान्तीति सरोजनाभः
त्यागेश्वरं यत्र बभार भक्त्या ॥ १५ ॥

तच्चापि वक्षः पुरुषोत्तमस्य
विहाय, मुक्त्वापि च जिष्णु नाकम् ।
लोकप्रसादं मुचुकुन्दमूलं
यत्रावतीर्णो वितनोति देवः ॥ १६ ॥ (युग्मकम्)

रथेन वत्सघ्नमपि स्ववत्सं
गां प्रीणयंश्चक्रबलिं चकार ।
तथोग्रधर्मा मनुनीतिचोलः
पुरं पुरा यं प्रशशास राजा ॥ १७ ॥

यो दभ्रभक्तस्य शिशोः शरीरं
शाकाय सद्यौदन ऐच्छदङ्गम् ।
सोमेष्टिमारस्य विवेश वाटं
श्वीकृत्य वेदान् श्वपचीकृतात्मा ॥ १८ ॥

मित्रीभवन् सुन्दरमूर्तिनाम्नः
प्रेम्णा श्रवो यो विटतां च बिभ्रत् ।
स्वमूर्धपादं विधिविष्ण्वदृश्यं
वेशप्रवेशे सुलभं चकार ॥ १९ ॥

इत्यादिका यत्र विराजतः श्री-
त्यागेशितुस्तस्य विचित्रलीलाः ।
कुर्वन्ति नित्योत्सवमालयं यद्
विडम्बनाद्वा मधुरादिलीला ॥ २० ॥ (कुलकम्)

निर्माय नूत्नं बृहदालयं स्वं
स राजराजः शिवपादचूडः ।
यमेव तत्रापि यदर्पितात्मा
त्यागं प्रतिष्ठापयति स्म देवम् ॥ २१ ॥

मय्येव लीनाः प्रलयेऽन्यदेवा
इतीव यो दुर्यवनोद्द्रुतांस्तान् ।
स्वस्थानकोणेऽन्तरभावयच्च
कामेक्षणादभ्रसभेशमुख्यान् ॥ २२ ॥

तञ्जापुरी यद्यपि राजधानी
रमापुरी नः कुलदेवधानी ।
इत्यादरादान्ध्रमराठराजै-
रुपासितस्त्यागविभुर्य एव ॥ २३ ॥

यदङ्घ्रिनीरन्ध्रनिषेवणोत्का
अप्पय्यमख्यादिकुलीनमुख्याः ।
सुरा इव क्षोणिसुरा उपान्त-
ग्रामेषु कामं निबिडीबभूवुः ॥ २४ ॥

शक्त्या शिवो युक्त इतः प्रपञ्चा-
वस्थामितीमं प्रणवाक्षरार्थम् ।
उमागुहाभ्यां निकटोल्लसद्भ्यां
त्यागेश्वरो यः प्रकटीकरोति ॥ २५ ॥

यत्प्रेम नीलोत्पलनायिकार्यां
नीलोत्पले चैव समं प्ररूढम् ।
ताटङ्कयोर्यस्य जवन्तिकेष्टा
सर्वाङ्गपुष्टिश्च सुमाभिषेकैः ॥ २६ ॥

पार्श्वद्वयान्दोलनपूर्वमूर्ध्व-
मुत्पत्य पातान् नटने यदीये ।
अन्तर्मुखाश्चापि बहिर्मुखाश्च
दृष्ट्वा समं निर्वृतिमश्नुवन्ति ॥ २७ ॥

उत्काहलं शुद्धमृदङ्गयुक्तं
तद्धीधिधीधीति यदीयनाट्यम् ।
अनुब्रुवाणाः कमलापुरीया
वृद्धाः शिशून् हन्त विनोदयन्ति ॥ २८ ॥

कदाचिदेवेति बहिः स्वपट्टं
न्यस्यान्यदेवे कुरुतेऽधिकारम् ।
सिंहासने खड्गयुगं बिभर्ति
स्वां राजतां निर्वहतीदृशं यः ॥ २९ ॥

मूर्तिर्यदीया यदि षट्स्थलेषु
प्रतिष्ठिता दक्षिणदिश्यमुष्याः ।
योगीड्यमूर्तेः कथमीरयामः
त्यागाभिधायाः परमं प्रकर्षम् ॥ ३० ॥

समुत्फणे कुण्डलिनि प्रनृत्यन्
यद्द्वारि बाभाति गणाधिनाथः ।
निदर्शयन् क्षेत्ररहस्यमूला-
धारप्रबोधोत्तमयोगविद्याम् ॥ ३१ ॥

सुवर्णकर्षाख्यगणाधिनाथं
प्रत्यक्प्रवेशे विनिवेश्य येन ।
निजालयागन्तुकचित्तमात्रा-
परीक्षणं साधु विधीयते नु ॥ ३२ ॥

नानाविलासाञ्चितदेवजुष्टै-
रुच्चावचैश्चित्रविमानकूटैः ।
रूप्याचलः स्वर्णगिरिर्यथा वा
यस्यालयो भाति तथा विशालः ॥ ३३ ॥

रुद्रास्सहस्राणि सहस्रशोऽधि-
भूम्यामिति प्राच्यवचोऽनुसारम् ।
पदे पदे भान्ति यदालयान्तः
गेहान्यसंख्यं शिवलिङ्गवन्ति ॥ ३४ ॥

स्वयम्भुवल्मीकविटङ्कलिङ्गं
यस्यालये मुख्यतया विराजत् ।
क्षेत्रस्य पृथ्वीस्थलतां च मूला-
धारस्थलत्वं च समं व्यनक्ति ॥ ३५ ॥

पुरा चमत्कारनृपप्रसाद-
व्याजेन तेजोऽचलमात्मबिम्बे ।
बिभ्रत्सदा यत्र यथार्थनामा
ज्योतिर्मयो भात्यचलेश्वराख्यः ॥ ३६ ॥

यत्सन्निधौ जैननिराकृतेन
भक्तेन च स्वीयतडागतोयैः ।
अदीपि दीपो निगमश्च योऽसा-
वग्नेरपामयितनत्वमाहे ॥ ३७ ॥

पुरा वराहद्विजदुर्लभाङ्घ्रि-
शीर्षेण लिङ्गोद्भव उत्थितो यः ।
स यत्र पातालनभोऽद्रिलिङ्गः
बिले च माले च विभज्य भाति ॥ ३८ ॥

लिङ्गोत्तमं हाटकनाम यत्र
क्षेत्रस्य नामान्तरदायि भाति ।
आनन्दसिद्धेश्वरमुख्यलिङ्गा-
न्यानन्दसिद्ध्यादिकराणि भान्ति ॥ ३९ ॥

रथस्य शोभा कमलापुरीति
सत्यां प्रथां सर्वत एव तन्वन्।
विराजते हन्त महान् मनोज्ञः
त्यागेशितुर्यस्य रथप्रवेकः ॥ ४० ॥

कैलाससानुः किमु चारुमेरु-
शृङ्गोऽथवा मन्दरकन्दरः किम्।
जातोऽद्भुतं जङ्गम इत्युदेति
संशीतिरालोक्य रथोत्तमं यम् ॥ ४१ ॥

मध्येसमुद्रं स्तिमितं यथा वा
नौः कापि यायान्महती यथा च।
घण्टापथे कोऽपि मतङ्गजेन्द्रः
तथा हि गम्भीरस्थस्स याति ॥ ४२ ॥

यानं तदीयं यदि नेत्रहारि
वक्ष्यामि लक्ष्मीं कथमस्य चित्रम्।
वीथ्यन्तकोटीपरिवर्तनस्य
प्रारिभ्रमन्मन्दरसुन्दरस्य ॥ ४३ ॥

देवौकसो नैर्ऋतदिग्गतस्य
सद्यः पुरो यत्र दृशोरुदेति।
कोऽप्यत्युदारः कमलालयाख्य-
तडागरूपः सुषमाप्रभूमा ॥ ४४ ॥

कटत्रये केरपरम्पराणां
　　हारित्यमध्ये परभागितश्रीः ।
समण्डपः सोज्ज्वलनीलनीरः
　　कांचिच्छ्रियं पुष्यति चित्रवद् यः ॥ ४५ ॥

सोद्यानदेवायतनेन मध्ये
　　सुबद्धसोपानपरम्पराभिः ।
नीरन्ध्रतीरस्तनुरम्यघट्ट-
　　देवालयैर्मण्टपमण्डलैश्च ॥ ४६ ॥

किञ्जल्कवत्कर्णिकया मरन्द-
　　पूरैस्सहस्रोच्चदलैर्यथा स्यात् ।
किमप्यदभ्रं कमलं तथा यत्
　　भात्यम्बुनित्यं कमलाख्यतीर्थम् ॥ ४७ ॥

पूर्णा यदापो ननु लक्षयन्ति
　　योगान्तसञ्जातरसप्रवाहान् ।
स नागनाथश्च तदन्तरा यो
　　व्याख्याति तां कुण्डलिनीं प्रबुद्धाम् ॥ ४८ ॥

क्षीरादिकुण्डानुदरे दधानं
　　देवादितीर्थानि च तीरभूमौ ।
वक्तुं क्षमं यं कमलालयाख्यं
　　सर्वावनीतीर्थसमष्टिमेव ॥ ४९ ॥

यत्राप्लुतानां पदमुत्तरं तत्
वितीर्यते नूनमितीव वक्तृ ।
त्यागप्रभोरुत्तरफल्गुनीषु
पदं निगूढाद्धरिरेति रूपात् ॥ ५० ॥

वाराणसीतोऽपि वरीयसीतः
समाप्लुतानाममृतत्वसिद्धयै ।
रुन्धन् यमं दक्षिणतीरमध्य-
मध्यास्य यस्यास्ति हि विश्वनाथः ॥ ५१ ॥

यज्ञेशितुर्यस्य तटे प्रतीच्यां
घट्टस्ससन्यासिमठो विभाति ।
चित्तप्रसादाय च मुक्तये च
योगद्वयानुग्रहजागरूकः ॥ ५२ ॥

देवोत्सवे यत्र गभीरनाग-
स्वरस्य दीर्घा स्तिमितेऽर्धरात्रे ।
यदीयनीरोपरि वाह्यमानां
शृण्वन्ति धन्या अमृताभगीतिम् ॥ ५३ ॥

देवोत्सवे यत्र पुरोहितत्व-
मिन्द्रावतारान्वयपञ्चमस्य ।
श्वेतातपोत्तुङ्गितगौरवस्य
तत्क्षेत्रमाहात्म्यविशेष एकः ॥ ५४ ॥

यस्यास्यतो नादतनोरभूवन्
सप्तस्वराश्चापुटादितालैः ।
यो व्याकरोत्सोमवपुर्विलासै-
र्नाट्यस्य मार्गं मृदुमुद्धतं च ॥ ५५ ॥

तस्येश्वरस्याद्भुतनृत्तमूर्ति-
माबिभ्रतस्त्यागविभोः प्रसादात् ।
चित्रं किमन्यादृशमृद्धिमाप्तं
सङ्गीतकं श्रीनगरे समिन्धे ॥ ५६ ॥ (युग्मकम्)

एकत्र देवारविदां वरिष्ठा
अन्यत्र नागस्वरवाद्यशूराः ।
परत्र नाट्यागमशिक्षकाश्च
वेश्याङ्गना लास्यविचक्षणाश्च ॥ ५७ ॥

ज्ञानेन कण्ठेन च पेयगेयाः
लक्ष्ये च लक्ष्मण्यपि कोविदाश्च ।
साङ्गीतिकैः श्रीनगरीयमेवं
सरस्वतीपत्तनतां हि नीता ॥ ५८ ॥ (युग्मकम्)

श्रीत्यागराजचरणाम्बुजचञ्चरीक-
श्रीपत्तनाभिजनराघवनिर्मितेऽस्मिन् ।
श्रीदीक्षितेन्द्रचरिते रचितोऽयमेवं
श्रीक्षेत्रदिव्यगुणवर्णनपीठबन्धः ॥ ५९ ॥

इति श्रीश्रीनगराभिजन-कौशिकश्रीराघवशर्मणा
विरचिते श्रीमुत्तुस्वामिदीक्षितचरिते
॥ श्रीपुरवर्णनं नाम प्रथमः सर्गः ॥

॥ द्वितीयस्सर्गः ॥

एवं भक्तिकलाश्रीभिः श्रीमति श्रीपुरेऽभवन् ।
वंशा वाग्गेयकाराणां बहवो बहुदेशजाः ॥ १ ॥

तेष्वेव जनिमासेदुरार्यदीक्षितशाखिणः ।
ते कर्णाटकसङ्गीतप्रपञ्चेऽद्यत्रिमूर्तयः ॥ २ ॥

तेषु त्रिलिङ्गमुरिकिनाटीयो वैदिकोऽन्वयः ।
रामब्रह्मविदग्रण्यभरद्वाजान्ववायजः ॥ ३ ॥

बभूव कोऽपि काकर्लगृहनामविभूषितः ।
तस्मिन्नान्ध्रीकविर्जज्ञे गिरिराजाभिधो द्विजः ॥ ४ ॥

रामब्रह्मेति तत्पुत्रो रामब्रह्मपरोऽभवत् ।
शान्ताम्बा नाम यस्यासीत् सती शान्तिरिवोदिता ॥ ५ ॥

"माकु रामुडु तन्डी"ति यत्पश्चाल्ललितं जगौ ।
तद्द्विधा सार्थयन् तस्य जातुस्तनयसत्तमः ॥ ६ ॥

त्यागराज इति क्षेत्रदेवनाम्ना यमाह्वयन् ।
यस्माद्धिमालयोदारात् प्रावहन् गाननिर्झराः ॥ ७ ॥

ह्लादनाः पावनाश्चैव विश्वस्य जगतो रसैः ।
द्राक्षापाकायिता धातुमातुसारस्यनिर्भराः ॥ ८ ॥

यद्देयबन्धा राजन्ते विद्वत्पामररञ्जकाः ।
श्रीपुरीनवव्रीथीतस्त्यागराजकुटुम्बकम् ॥ ९ ॥

जगाम न चिरादेव क्षेत्रं पञ्चनदाह्वयम् ।
यस्या मन्दस्मितज्योत्स्ना वागब्धिमतिवेलयेत् ॥ १० ॥
यामाहू राजमातङ्गीं साक्षात्सङ्गीतदेवताम् ।
तस्याः काञ्चीपुरीराज्ञ्याः कामाक्ष्याः कामधुग् दृशः ॥ ११ ॥
षण्मतस्थापनाचार्यैस्सर्ववाममतान्तकैः ।
या कल्पिता शङ्कराचार्यैः वैदिक्यर्चनपद्धतिः ॥ १२ ॥
तन्नियोगैककृतिनां कामाक्ष्या धनिनामपि ।
स्मार्तोत्तरब्राह्मणानां गौतमानामभूत्कुलम् ॥ १३ ॥
ब्रह्मदेवालयार्चानां दीक्षितानां विनाशने ।
तुण्डीरेषु तुरुष्काणामेधमाने प्रबाधने ॥ १४ ॥
हित्वा काञ्चीं कुलमिदं कुलमूलधनायिताम् ।
आदाय स्वर्णकामाक्षीं प्रतस्थे दक्षिणां दिशम् ॥ १५ ॥
तुरुष्कव्रातकालाभ्रवात्यायितशिवान्वयैः ।
महाराष्ट्रनृपैर्दत्तसौराज्यक्षेमभूमसु ॥ १६ ॥
चोलेषु नानाग्रामेषु कंचित्कालं कृतस्थिति ।
आकृष्टं क्षेत्रमाहात्म्यात् कमलां प्राप तत्कुलम् ॥ १७ ॥
आलये त्यागराजस्य कामाक्षीं तां प्रतिष्ठिताम् ।
आराधयति तद्वंशे वेङ्कटाद्रिसुतोऽभवत् ॥ १८ ॥
विश्वनाथाभिधस्तस्य बभूव सुतसत्तमः ।
श्यामाशास्त्रीति यं प्राहुः श्यामानुग्रहभाजनम् ॥ १९ ॥

सदा पुरःस्फुरच्छ्यामां साक्षात्सम्भाषणोपमैः ।
मृदुप्रसन्नसरलसुकुमारपदान्वितैः ॥ २० ॥
लयविन्यासवैदग्ध्या गजेन्द्रगमनोपमैः ।
स्वल्पैरपि गुणानल्पैः कीर्तिं यः कीर्तनैर्ययौ ॥ २१ ॥
पश्चात्तज्जापुरी पश्चाद्वीथीं राजनिमन्त्रिताः ।
कामाक्ष्या सह ते याताः शास्त्रिमुख्या रमापुरात् ॥ २२ ॥
काञ्च्यामेव बभूवान्ये ब्राह्मणाः काश्यपान्वयाः ।
आपस्तम्बीयसूत्रानुसारिणो यज्वसत्तमाः ॥ २३ ॥
बभूव तेषु विख्यातो वेङ्कटेश्वरदीक्षितः ।
सत्या भागीरथीनाम्न्या गार्हस्थ्यमधितस्थिवान् ॥ २४ ॥
रामस्वामीति सञ्जातस्तयोः प्रवयसोस्सुतः ।
सप्तमे वत्सरे यस्य यवनोपद्रवोऽभवत् ॥ २५ ॥
बाल एव स वृद्धाभ्यां पितृभ्यां सह निर्गतः ।
तुण्डीरात्सह्यजातीरं शरण्यं समुपागमत् ॥ २६ ॥
नाममाहात्म्यगुरुभिर्बोधेन्द्रैस्तत्र पावितम् ।
ग्राममावासयामास गोविन्दपुरनामकम् ॥ २७ ॥
मुक्त्यर्थमिव तत्क्षेत्रमागतौ तौ वयोऽधिकौ ।
तद्गुरूनचिरादेव जग्मतुर्गतिमुत्तमाम् ॥ २८ ॥
एवं विधुरितस्सद्यः किं करोतु स बालकः ।
असञ्जातसुहृद्बन्धौ विशेषाद्विषये नवे ॥ २९ ॥

तद्दशां वीक्ष्य गुरवः केचिद्गुरुदयेरिताः ।
ब्राह्मणोचितविद्यानामन्वगृह्णन् प्रदानतः ॥ ३० ॥
एवं वेदं च काव्यं च शास्त्रं च पठतोऽचिरात् ।
उदबुध्यत मातङ्ग्याः प्रसादाद्ज्ञानवासना ॥ ३१ ॥
अपठत्सुस्वरं काव्यमगायल्लक्षणान्वितम् ।
कर्णे निपतितानेष गेयबन्धान्मुहुर्मुहुः ॥ ३२ ॥
तस्य कण्ठं च रागं च ज्ञानं तालं च निर्णयम् ।
वीक्ष्य तं प्रेरयन् सर्वे गुरुं गानाय सेवितुम् ॥ ३३ ॥
कावेर्या दक्षिणे तीरे नाट्यविद्वत्कुटुम्बिनाम् ।
नृत्तभोगतया पूर्वं दत्तं चोलावनीश्वरैः ॥ ३४ ॥
राष्ट्रे तञ्जापुरान्नातिदूरे वेण्णाधुनीमनु ।
अस्त्यग्रहारो वरदराजकारुण्यवर्धितः ॥ ३५ ॥
सिद्धिबुद्धिसमेतश्रीविनायकवरोदयः ।
यमुन्नतपुराख्यानं पश्चात्तञ्जापुरीश्वरः ॥ ३६ ॥
अच्युताब्धिरिति स्वीयनाम्ना सोऽच्युतनायकः ।
गान्धर्वनाट्यमल्लादिविविधागमवेदिनाम् ॥ ३७ ॥
आन्ध्रचोलब्राह्मणेभ्यो ब्रह्मदेयतया ददौ ।
यत्र द्रविडभाषायां मिलट्टूरिति संज्ञिते ॥ ३८ ॥
सा भागवतमेलाख्या पुंस्त्वास्ते नाट्यपद्धतिः ।
नीता वेङ्कटरामाख्यैः शास्त्रिभिः परमां श्रियम् ॥ ३९ ॥

को दासीलास्यरसिको येन नाश्रावि नेक्षितः ।
हुशानीस्वरजत्याख्यो नाट्यलक्ष्येष्वनुत्तमः ॥ ४० ॥

तन्मातृकामच्युताब्धिवरदेशपरां पराम् ।
यो निर्ममे श्रीवरदनामाङ्कानि पदानि च ॥ ४१ ॥

अच्युताब्ध्यान्ध्रमुख्यस्स वीरभद्रार्यनामकः ।
तज्ञाप्रतापसिंहेशसभ्यविद्वत्कुलाग्रणीः ॥ ४२ ॥

प्रतापरामाङ्कबहुप्रबन्धग्रथितोऽभवत् ।
तमेवाचार्यमुचितं रामस्वामी समाश्रयत् ॥ ४३ ॥

स्वयमुद्बुद्धसङ्गीतज्ञानसंस्कारसिद्धये ।
तस्यान्ते वसति स्मैष वर्षौ द्वावेव तीव्रधीः ॥ ४४ ॥

रागस्वरसमालम्बिलयपल्लविवर्त्मनाम् ।
प्रत्यस्फुरंस्तं मर्माणि व्याजोऽभूद्गुरुसन्निधिः ॥ ४५ ॥

अथ वर्षद्वयस्यान्ते स रामस्वामिदीक्षितः ।
गुरोरनुज्ञामासाद्य मध्यार्जुनमुपागमत् ॥ ४६ ॥

चेन्नप्पेनाच्युतेशेन रघुनाथनृपेण च ।
सिंहासनार्धमास्थाय येऽशासुश्चोलमण्डलम् ॥ ४७ ॥

मन्त्रिमुख्या यज्ववर्या अद्वैताचार्यसत्तमाः ।
गोविन्ददीक्षिता नाम पट्टीश्वरकृतालयाः ॥ ४८ ॥

विद्यारण्यीयसङ्गीतसारमालोक्य विस्तरात् ।
आक्षिप्तिकादिमार्गेण पञ्चाशद्रागलक्षणम् ॥ ४९ ॥

न्यरूपयन् ये सङ्गीतसुधानाम्नि निबन्धने ।
वीणां श्रीरघुनाथाख्यमेलं ये चाप्यकल्पयन् ॥ ५० ॥

सर्वमेलीयरागाणां युक्तां वादनकर्मणे ।
तेषां सरससाहित्यसङ्गीतागमपण्डिताः ॥ ५१ ॥

बभूवुर्मखिनः पुत्रा यज्ञनारायणाभिधाः ।
तेषामनुजतामन्तेवासितां च समं गताः ॥ ५२ ॥

वेङ्कटाध्वरिणोऽभूवन् वाक्ये गीते च पारगाः ।
प्रेरिता ये च विजयराघवावनिजानिना ॥ ५३ ॥

पुमर्थत्यागविख्यातत्यागराजप्रसादतः ।
सङ्गीतशास्त्रमातेनुश्चतुर्दण्डीप्रकाशिकाम् ॥ ५४ ॥

दर्शयन्तीं गीतनाट्यप्रबन्धालापफक्किकाः ।
सर्वेषामेव रागाणां भवद्भूतभविष्यताम् ॥ ५५ ॥

मेलप्रस्तारपर्याप्तां द्विसप्ततिविधिं तथा ।
होनर्ष्यपुत्रतानप्पकृतगीतादिवर्त्मना ॥ ५६ ॥

तथैव पञ्चपञ्चाशद्रागाणां लक्षणप्रदाम् ।
रागलक्षणगीतानि प्रबन्धुंश्च ये बहु ॥ ५७ ॥

मध्ये सेतुपथं दस्युभयं ये च न्यवर्तयन् ।
रामस्तवेन ललितारागलक्षणगीतिना ॥ ५८ ॥

तत्सम्प्रदाये समभून्मुत्तुवेङ्कटदीक्षितः ।
शाहेजीराजमुद्राणि यश्च गीतानि संजगौ ॥ ५९ ॥

मध्यार्जुनाभिधे क्षेत्रे बभूव च तदन्वयी ।
वेङ्कटश्रीवैद्यनाथमखी सङ्गीतकोविदः ॥ ६० ॥

आससाद तमाचार्यं वीरभद्रादनन्तरम् ।
शास्त्रलक्षणसम्पत्त्यै रामस्वामी वरोद्यमः ॥ ६१ ॥

तानप्पवेङ्कटमखिप्रवरप्रवृत्त-
सत्सम्प्रदायगतलक्षणगीतजातम् ।
मेलद्विसप्ततिमुखां अपि शास्त्ररीती-
र्वर्षेण सोऽलभत वेङ्कटवैद्यनाथात् ॥ ६२ ॥

श्रीत्यागराजचरणाम्बुजचञ्चरीक-
श्रीपत्तनाभिजनराघवनिर्मितेऽस्मिन् ।
श्रीदीक्षितेन्द्रचरिते रचितोऽयमत्र
श्रीदीक्षितेन्द्रगुरुवर्णनतः प्रवेशः ॥ ६३ ॥

इति श्रीश्रीनगराभिजन - कौशिकश्रीराघवशर्मणा विरचिते
श्रीमुत्तुस्वामिदीक्षितचरिते श्रीदीक्षितेन्द्रगुरुवर्णनं
नाम द्वितीयस्सर्गः ॥

॥ तृतीयः सर्गः ॥

अथ शिष्यमवेक्ष्य पारगं
ललिते गानकलागमे गुरुः ।
नृपते रसिकस्य संसदि
स्पृहयामास तमात्तसत्कृतिम् ॥ १ ॥

अधितञ्जमपालयन् हि ये
धरणीं ते निखिला रराजिरे ।
कदने प्रमुखा न केवलं
कवने नर्तनगानयोरपि ॥ २ ॥

न तदद्भुतमीश्वरानिमान्
यदमन्यन्त कलाविमर्शने ।
कवयो वरगायकास्तथा
निकषं नैजगुणप्रसिद्धये ॥ ३ ॥

गुरुवेङ्कटवैद्यनाथवाक्-
कृतराजान्तिकसुप्रवेशनः ।
प्रकटीकुरुते स्म भूभुजः
पुरतो राममखी कलां निजाम् ॥ ४ ॥

मुमुदे स च यज्वने भृशं
बहुदानानि वितीर्य पार्थिवः ।
नृपधाम विहाय दीक्षितोऽ-
प्यथ मायूरमुपागमत्स्थलम् ॥ ५ ॥

दिवसाननुभूय कांश्चना-
प्यभयाम्बायुतदेवदर्शनम् ।
कमलालयमाजगाम स
प्रथितत्यागविभोर्दिदृक्षया ॥ ६ ॥

कमलालयतीर्थमज्जनै-
श्चरितार्थीकृतवासरोदयः ।
बृहदालयनैकसन्निधि-
श्रयणैर्धन्यदिनात्ययस्तथा ॥ ७ ॥

तपसे धृतकुक्कुटासनां
कमलां, त्यागविभुं रहोनटम् ।
अवसत्पुरि तत्र स स्तुवन्
स्वगिरा गेयमधुद्रवाक्तया ॥ ८ ॥

अथ फाल्गुनमास आगतः
प्रसृतो वार्षिक आलयोत्सवः ।
शुशुभे सुरधाम मण्डनै
रुरुधे चापि पुरी जनागमैः ॥ ९ ॥

विविधोत्सवमूर्तियात्रया
समपुष्यन् विशिखाः परां श्रियम् ।
वहति स्म सुधातरङ्गिणी-
निभनागस्वरगानमाधुरी ॥ १० ॥

फलशाकपलाशमञ्जरी-
निकरैश्चित्रवसन्तमण्डपम् ।
मधुनैव विभोरुपाहृतं
प्रवभौ सान्विवं गन्धमादनात् ॥ ११ ॥

समहन्यत शुद्धमद्दलः
सममध्मायत काहलावली
श्रवणेषु ववर्ष निर्वृती-
रजपानृत्यलयस्य माधुरी ॥ १२ ॥

प्रचरन् पुरतश्च पृष्ठतोऽ-
प्यथ लोलनुभयोश्च पार्श्वयोः
उपरि क्रमशस्समुत्पतन्
अजपानृत्यमदर्शयद्विभुः ॥ १३ ॥

गमनागमने रयं विभोः
वहनोद्युक्तजना न सेहिरे
विदधुर्नटने महारसाः
अनुदेवं गमनागमं जनाः ॥ १४ ॥

करजानुषु भुग्नमर्भक-
प्रतिमं पश्चिमरूपमीशितुः
प्रसृते भगवत्यपीक्षितुं
कतिचित् पृष्ठगता ललम्बिरे ॥ १५ ॥

प्रभुमूर्तिसमुत्प्लवाय यत्
सरहोयन्त्रकदण्डयुग्मकम् ।
घनराजतमन्तरास्ति तत्
पृथुलांसेषु पपात टङ्कडिति ॥ १६ ॥

कदलीफलमाननेऽसयोः
बहल चन्दनपङ्कमक्षिपन् ।
नटनार्थकदण्डधूर्धृता-
मुरुपातश्रमहानये मुहुः ॥ १७ ॥

(श्रमहानाय मुहुः सहेत्वराः ॥)

बहिरान्तरदण्डिकास्समा
इलया पिङ्गलया सुषुम्नया ।
सममात्मन एव चेश्वरं
नटने तत्र सुमेधसो विदुः ॥ १८ ॥

नटराज इति प्रथा वृथा
कथिता तस्य चिदम्बरेशितुः ।
इह हीक्षितुमस्ति तत्त्वतः
परमोदारमुमेशनर्तनम् ॥ १९ ॥

इममद्भुतहंसनर्तनो-
त्सवमासेवितुमुत्कमानसः ।
स च सन्निहितोऽभवत्तदा
वरतञ्जामरसिंहभूपतिः ॥ २० ॥

नृपसन्निधिनावधानतः
सुसमृद्धया निरवर्त्यतोत्सवः ।
विभुरप्यभजत् सुखासिकां
सुमनोरम्यवसन्तमण्टपे ॥ २१ ॥

कमलेश्वरभक्तसाहजी-
तुलजैकोजिमुखैर्महीश्वरैः ।
इतरैरपि धातुमातुवि-
त्प्रवरैर्यानि कृतानि नैकधा ॥ २२ ॥

पदवर्णदरूणि कीर्तना-
न्युपयुक्तान्यभिनेयगेययोः ।
मधुरस्वररुद्रकन्यकाः
कतिचित्तेषु जगुः प्रभोः पुरः ॥ २३ ॥

इतराण्यपि तेषु कानिचिद्
भगवन्नायकभाववन्ति च ।
नटनाभिनयैरयोजयन्
पुनरन्या वररूपयौवनाः ॥ २४ ॥

अनवेक्ष्य तदार्धयामिकं
भगवत्पूजनमुर्वराधिपः ।
समियेष न किञ्चनाशितुं
प्रयतो विश्रमितुं न वा निशि ॥ २५ ॥

निकषास्ति हि यागशालिका
भविता यत्र महोऽप्यहर्मुखे ।
निबबन्ध सदस्तदग्रतो
नृपतिर्गायकविद्वदावृतः ॥ २६ ॥

प्रथमं विनतं रमाधुरः
प्रथितं मेलॅयुगं बृहत्तनु ।
उचितैरुरुपारितोषिकै-
रनुजग्राह वसुन्धराधवः ॥ २७ ॥

समितौ समिदिद्धपावक-
प्रतिमोऽदीप्यत रामदीक्षितः ।
तमतिप्रणयार्द्रवीक्षित-
स्मितजल्पैरधिराडुपाचरत् ॥ २८ ॥

अध्युष्यतेऽद्य भवता कमलापुरीति
मत्वा गुणं द्विगुणमस्य महास्थलस्य ।
आगच्छमद्भुतमवेक्षितुमीशनृत्तं
श्रोतुं तथा च भवदुत्तमगेयबन्धान् ॥ २९ ॥

दृष्ट्वा भवन्तमधुना गत एव कोऽपि
कालस्तथापि भवता यदगायि पूर्वम् ।
तज्ज्ञापुरे तदधुनाप्यपयाति नैव
कर्णात्, किमस्ति नवनिर्मितिरद्य कापि ॥ ३० ॥

इत्यादराद्रसिकवर्यमहीश्वरेण
संचोदितस्सदसि राममखीश्वरोऽसौ ।
गाति स्म नूतनविनिर्मितरागमाला-
सन्दर्भमन्वितनृपामरसिंहकीर्तिम् ॥ ३१ ॥

तत् साहित्यं रागभावं च तं तं
तत्तत् गत्यां तालविन्याससौक्ष्म्यम् ।
तन्त्रीश्रुत्यां तच्च लीनं सुकण्ठं
पीत्वाऽमाद्यन्मध्विव क्षोणिपालः ॥ ३२ ॥

तद्गीतेर्यदमृतमन्तरा प्रविष्टं
तद्बाह्वोर्घनपुलकप्ररोहमात्रम् ।
नातानीदपि तु बहिश्च दानधारा-
रूपेण प्रवहति भूभुजस्स्म दीर्घम् ॥ ३३ ॥

स दीक्षितो महीक्षितः प्रभूतभूतिमीयिवान्
स्थलोत्तमे रमापुरे बबन्ध वासमात्मनः ।
न हातुमेष वीथिकाविटङ्कसीम चक्षमे
तथा मनोऽस्य योगनर्तने विभोरलीयत ॥ ३४ ॥

अथैकदा कृतशिवदर्शनो मखी
चिरं निशामनयदनिद्रमेव सः ।
पुनः पुनः किमपि विवक्षुवद्भिभोः
स्मितद्विधामधुरमुखं पुरो बभौ ॥ ३५ ॥

अपररजनियामे श्रान्तसुप्तं तमीशः
समवददवदाता प्राग्दिशा मुञ्च मञ्चम् ।
इह महति मदीये धाम्नि तत्तन्महे त्वं
रचय रुचिरकल्पं गीतवाद्यक्रमस्य ॥ ३६ ॥

इति ब्राह्मे यामे वरभगवदाज्ञामधिगतो
मखी रामस्वामी प्रमुदि भगवद्धाम्नि सकलान् ।
महान् गीतातोद्यक्रमविधिभिरायोज्य रुचिर-
व्यवस्याढ्यान् सम्प्रत्यपि सरणिरेषा विजयते ॥ ३७ ॥

श्रीत्यागराजचरणाम्बुजचञ्चरीक-
श्रीपत्तनाभिजनराघवनिर्मितेऽस्मिन् ।
श्रीदीक्षितेन्द्रचरिते पितृरामयज्व-
प्रख्यातिवर्णनपरो गत एष सर्गः ॥ ३८ ॥

इति श्रीश्रीनगराभिजन-कौशिकश्रीराघवशर्मणा
विरचिते श्रीमुत्तुस्वामिदीक्षितचरिते
पितृरामयज्ववर्णनं नाम तृतीयः सर्गः ॥

॥ चतुर्थस्सर्गः ॥

इति प्रभोरन्वहदर्शनैश्च तद्-
गुणोपगानेन कृती स यद्यपि ।
सखी सुखी नैव बभूव, तन्मनः
कयाप्यपूर्णत्वशुचातिविव्यथे ॥ १ ॥

प्रजा हि पूर्णं वितनोति मानुषं
प्रजा हि मर्त्यस्य ददात्यमर्त्यताम् ।
ऋणं पितॄणां प्रजया ह्यपोह्यते
प्रजास्वधीनं हि पितृस्वधाशनम् ॥ २ ॥

विषञ्चिकानादसुधास्तु शारद-
प्रभातसम्फुल्लसरोजमस्तु च ।
गिरः कला आननमच्छलस्मितं
शिशोः प्रदास्यन्ति कदा मुदं मम ॥ ३ ॥

कदा नु पूजाशुचिमेत्य चङ्क्रमैः
निपत्य चाङ्के मलिनीकरिष्यतः ।
शरीरयोगेन शिशोः समाधिवत्
विलोचनं मे मुकुलीभविष्यति ॥ ४ ॥

इति प्रसूतिस्पृहया स दीक्षितः
समा अनेका उदकण्ठताधिकम् ।

सदाङ्कगस्कन्दमुमापतिं सुत-
प्रसादमभ्यर्थयति स्म चान्वहम् ॥ ५ ॥

समुत्सुका हन्त ततोऽपि तत्सती
चचार किं किं न पतिव्रता व्रतम् ।
प्रदक्षिणेभ्यः कमलाम्बिकालयात्
चिरात्प्रतिप्रातरुपागमद् गृहम् ॥ ६ ॥

लिलेख वर्णोज्ज्वलरङ्गवल्लरीः
तदालये श्रीयुतचक्ररूपिणीः ।
विदा स्वभर्त्रैव कृतोपदेशना
जजाप मन्त्रांश्च जगौ स्तुतीरपि ॥ ७ ॥

कुमारमेव स्मरतोरहर्निशं
तयोः कुमारीभवनोत्सुकात्मनः ।
बभूव वैद्येश्वरधामराजिनो
निमन्त्रणं मुत्तुकुमारमूर्तितः ॥ ८ ॥

अतीव हर्षेण स रामदीक्षितः
सधर्मचारिण्यपि तस्य सुब्बमा ।
पदैव वैद्येशपदं प्रजग्मतुः
कृताध्वसर्वालयदेवदर्शनौ ॥ ९ ॥

त्रिरद्धि तत्पुष्करिणीनिमज्जनं
तदालयाष्टोर्ध्वशतप्रदक्षिणम् ।

पयोऽशनं मुत्तुकुमारकीर्तनं
तयोर्ययौ मण्डलमेकमीदृशम् ॥ १० ॥

स रामयज्वा सह भार्यया तथा
व्रतं समाप्य स्वपुरं समागमत् ।
बभार गर्भं न चिरेण सा सती
कुमारदिव्यांशसमुज्ज्वलीकृतम् ॥ ११ ॥

प्रियावपुः क्षाममशक्ति पाण्डुरं
मुहुर्मुहुर्वीक्ष्य स दीक्षितो भृशम् ।
तुतोष, दोषाश्च कदाचन ध्रुवं
प्रिया गुणोदर्कतया भवन्ति हि ॥ १२ ॥

अथोत्तमे मन्मथवत्सरे रवौ
झषं गतेऽफल्गुगुणे च फाल्गुणे ।
समं समुद्भर्तुमसौ कुलं कलां
असूत साध्वीमणिसुब्बमा सुतम् ॥ १३ ॥

तदीयजन्मादिगुणं स्तुमः कथं
वसन्तयात्रादिवसो हि सोऽभवत् ।
महो महादेवगृहे न केवलं
विवेश रामाध्वरिणोऽपि तद् गृहम् ॥ १४ ॥

महीतलस्पर्शनिमेष एव तत्
शिशोस्सुपुण्यस्य पपात कर्णयोः ।

स हंसनाट्यध्वनिरीश्वरालयात्
समुज्जिहानः परमोपदेशवत् ॥ १५ ॥

गतेष्वशौचेषु दिनेषु सा प्रसू-
स्तमात्मसीमन्तसुतं विभूषितम् ।
निनाय डोलां सुहृदङ्गनाजने
प्रगाति नीलाम्बरिगीतिलालनम् ॥ १६ ॥

अनुग्रहं मुक्तकुमारमूर्तितः
स्मरन् पिता नाम ददौ स्वसूनवे ।
समुक्तुना स्वामिपदेन स श्रुतः
कुमार एवेति कुमार आदृतः ॥ १७ ॥

अथ द्वितीयोऽपि सुतोऽभवत्तयो-
रमुं चिनस्वाम्यभिमाननामकम् ।
पिता गुरोर्वेङ्कटवैद्यनाथ इ-
त्युपाख्यया संस्कुरुते स्म भक्तितः ॥ १८ ॥

अजीजनद्यज्वपतिव्रता तत-
स्तृतीयमप्युत्तममात्मसम्भवम् ।
स चापि तेनैव कुमारवाचिना
स'बालुना' स्वामिपदेन पप्रथे ॥ १९ ॥

अनन्यगां स्वाम्यभिधां बिभर्ति यः
य एव पूर्वं प्रससाद यज्वने ।

कुमारदेवस्तदुपाख्ययैव ते
त्रयोऽपि पुत्रप्रवराः प्रकीर्तिताः ॥ २० ॥

सुतेषु सत्स्वप्यनवाप्य पुत्रिकां
मनः समुत्कण्ठत एव योषिताम् ।
अपूर्तिमेतामपहर्तुमम्बिका
ददौ च बालाभिधबालिकां तयोः ॥ २१ ॥

सहोदराणां त्रितयस्य साहिती
पुपोष लक्ष्मीमनयानुजातया ।
पदस्य रागस्य लयस्य साहिती
यथा सुतन्त्रीश्रुतिमच्युतां श्रिता ॥ २२ ॥

प्रसादयद्दीक्षितदम्पतीमनः
तदीयगेहे विजहार सङ्गतम् ।
चतुष्टयं तच्च तदात्मजन्मनां
कृतार्थयज्जन्म चतुःपुमर्थवत् ॥ २३ ॥

तनूभवा यद्यपि ते त्रयोऽप्यमी
तनूनपातस्त्रय आबभुर्यथा ।
तथापि तेषु प्रथमो गुणाधिकः
स मुत्तुनामा प्रथमोऽतिपप्रथे ॥ २४ ॥

पितुर्लुठन्नङ्कतले ततः करं
तदीयमादाय सुरालयं व्रजन् ।

अशिक्षतासौ बहुदेवतास्तुतीः
तथा कथाः पावनभक्तिवर्धनीः ॥ २५ ॥

तडागतः पूर्वमुपागमात्पितुः
स सज्जयामास शिवार्चनोचितम् ।
प्रदीपपुष्पाक्षतचन्दनादिकं
गुरोरपीशो मुमुदेतरां यतः ॥ २६ ॥

पितुस्स माध्याह्निकविश्रमान्तरे
रहस्समादय तदीयतम्बुराम् ।
श्रुतिं वितन्वन् मुमुदे स यद्विदन्
जहौ न शय्यां जनकः स्वपन्निव ॥ २७ ॥

मुहुस्स नीलोत्पलनायिकालयात्
प्रतायि नागस्वरमूर्छनाग्रहात् ।
चिराय तस्थावविदन् गुरुं गतं
यथा हि जालग्रथितो मृगार्भकः ॥ २८ ॥

गुरौ जपार्थं गुरुमूर्तिसन्निधौ
कृतासने मुत्तुकुमार एष च ।
विवेश देवाररुचिप्रचोदितः
पुरःस्थतैलाभिषवीयमण्डपम् ॥ २९ ॥

सुहृत्सु शिष्येषु च तातपादतः
पठत्सु गीतानि भवन्नदूरतः ।

प्रवृत्तगीतव्यवहारमर्मसु
श्रवोऽवधानेन ददौ स तीक्ष्णधीः ॥ ३० ॥

अथोचिते काल उपादिशद्गुरु-
र्द्वितीयजन्मप्रदमन्त्रमातृकाम् ।
तया दयातस्सकलाः कला अपि
प्रपाठ्य बालोऽकृत वीर्यवत्तरः ॥ ३१ ॥

ततोऽचिरादेव स मुत्तुमाणवः
पितुः शिवार्चासमये समीपगः ।
पपाठ रुद्रं पुरुषस्य सूक्तम-
प्युदात्तवाचा स्वरवर्णशुद्धया ॥ ३२ ॥

उषस्युपातिष्ठत काठकं गृणन्
सहस्ररश्मिं च स भानुवासरे ।
श्रियं च दुर्गां च नवग्रहांस्तथा
तदीयसूक्तानि जपन्नुपास्त सः ॥ ३३ ॥

ततोऽमरेणामरवाङ्मयाम्बुधिं
प्रवेशयामास बुधः पितुस्सखा ।
क्रमेण काव्यानि महान्ति रूपका-
ण्यपाठि कौमुद्यपि तेन मुत्तुना ॥ ३४ ॥

तर्कसङ्ग्रहमुखेन तत्परं
शास्त्रमार्गमवगाह्य स क्रमात् ।

अद्वयौपनिषदे कुलोचिते
दर्शने भृशसमुत्सुकोऽभवत् ॥ ३५ ॥

तत्र नैकविधशास्त्रवेदिनां
पूरिते प्रवचनै रमापुरे ।
को हि कर्णमपिधाय सञ्चरन्
नाप्नुयाल्लघु बहुश्रुतस्थितिम् ॥ ३६ ॥

ज्येष्ठं मुत्तुस्वामिनं भ्रातरौ तौ
बालूचिन्नस्वामिनौ चानुयान्तौ ।
बुद्धिश्रद्धोत्साहतः प्रायतेतां
सम्यग्विद्यासाधुवृत्तप्रसिद्ध्यै ॥ ३७ ॥

यत्सङ्गीतज्ञानमाजानसिद्धं
भूरिश्रुत्या लब्धसम्यग्विकासम् ।
तेषामासील्लक्ष्मतस्तस्य दार्ढ्यं
संस्कारं चाधातुमैच्छत्पिताथ ॥ ३८ ॥

कदाचन पिता स्वयं तनयबोधनं लीलया
चकार, सुहृदोऽन्यदा समदिशत् स्वशिष्यानपि ।
पुरातनपुरन्दरप्रमुखगेयविद्यागुरु-
प्रगीतिषु कुमारका विपुलपाठभाजोऽभवन् ॥ ३९ ॥

गीतप्रबन्धठाया-
लापनमूलादिलक्ष्मगीतौघैः ।

तेरुरपारं पारा-
वारं रागस्य ते बालाः ॥ ४० ॥

अष्टोत्तरशततालव्यवहृतिनैपुण्यसंसिद्धये ।
तालप्रबन्धसाधन-
मक्रियत तैर्विशेषेण ॥ ४१ ॥

वीणासु संस्तवमृते क इव प्रकर्षः
ज्ञानस्य लब्ध इति केऽपि वदन्ति विज्ञाः ।
तन्त्र्यां ततः कलितसाधुपरिश्रमास्ते
पित्रा यथार्थविधयापि कृताः प्रवीणाः ॥ ४२ ॥

त्यागराजभगवत्कृपाबलात्
तातमित्रविदुषां तथाशिषा ।
सोदरत्रितयगेयशेमुषी
शोभते स्म वरपाकमेयुषी ॥ ४३ ॥

श्रीत्यागराजचरणाम्बुजचञ्चरीक-
श्रीपँत्तनाभिजनराघवनिर्मितेऽस्मिन् ।
श्रीदीक्षितेन्द्रचरितेऽयमकारि नेतृ-
पुण्यावतारकथनेन तुरीयसर्गः ॥ ४४ ॥

इति श्रीश्रीनगराभिजन - कौशिकश्रीराघवशर्मणा विरचिते
श्रीमुत्तुस्वामिदीक्षितचरिते दीक्षितपुण्यावतारकथनं
नाम चतुर्थः सर्गः ॥

॥ अथ पञ्चमस्सर्गः ॥

अस्ति तीरभुवि पूर्ववारिधेः
चेन्नपत्तनमितीरितं पुरम् ।
यद्विनोपपदमेव पत्तनं
सर्वदक्षिणदिशीह विश्रुतम् ॥ १ ॥

नीलकण्ठदयिताव्रतौचिती-
चारुबर्हितनुकल्पकाम्बया ।
सा मयूरनगरीति विश्रुता
पेययोगितिरुवल्लुवोषिता ॥ २ ॥

भारतप्रधनखेदशान्तये
पार्थसारथिविभूषसेविता ।
सा प्रसन्नहरिणाप्यधिष्ठिता
श्रीपदप्रवरकैरविण्यपि ॥ ३ ॥

एवमादिबहुदेवसन्निधि-
प्रोल्लसत्पुरसमष्टिरूपि यत् ।
पण्यसम्पदतिवेलवैभवं
तूर्णमाप सितराजधानताम् ॥ ४ ॥

यस्य कोऽप्यतिशयोऽयमस्ति यद्
दक्षिणोत्तरदिशोर्विराजते ।
वामलूरपुरमाधिपत्तनं
त्यागराजलसितं स्थलद्वयम् ॥ ५ ॥

योगनर्तकरमापुरीविभु-
त्यागराडुषितषट्स्थलान्तरे ।
अन्य एव महिमास्य राजते
श्रीमदाधिनगरस्थलस्य हि ॥ ६ ॥

यत्र भाति स परः शिवः पटं-
पक्कनाथ इति पट्टकान्तरे ।
टङ्कमूर्तिमभजत् स्वयं भवो
वामलूरमय एव केवलम् ॥ ७ ॥

यत्र वर्णनिगमं च पाणिने-
र्व्याकरोड्डमरुणा नटेश्वरः ।
व्याक्रियावितरणाख्यमण्टपे
यत्पुरोऽधिजगिरे पदं बुधाः ॥ ८ ॥

उत्तरापथमहाव्रतद्विजैः
पल्लवेश्वरनिमन्त्रितैः पुरा ।
त्र्यम्बकाभिधतदध्वदेशिको
यत्र दक्षिणदिशि प्रतिष्ठितः ॥ ९ ॥

अद्वितीयगुरवश्च शङ्कराः
सर्ववामपथशासकाः पुरा ।
यत्र चक्रमुपकल्प्य कालिका-
स्वैररौद्रचरणं न्यवारयन् ॥ १० ॥

वैदिकं त्रिपुरसुन्दरीजन-
न्यर्चनक्रममकल्पयंश्च ते ।
मातुरौपनिषदैरुपासन-
प्रक्रियात्र यदुपज्ञमेधते ॥ ११ ॥

पल्लवे विजयकम्पवर्मणि
क्ष्मापतौ सति निरञ्जनाभिधाः ।
यत्र सिद्धिकरगह्वरस्थिता
आलयाधिपतयश्चकाशिरे ॥ १२ ॥

तद्गुहां तदधिकारमप्यथ
प्राप्य यत्र चतुराननाभिधः ।
पण्डितो विरुरुचे प्रवर्तयन्
स्वाख्यया मठपरम्परामपि ॥ १३ ॥

चोलभूपतिपरान्तकात्मभू-
मौलसैनिकचरः कुमारकः ।
स्वप्रमादजविरागवेगतः
यो निवृत्तिपथमेवमाश्रितः ॥ १४ ॥
(युग्मकम्)

सह्यजाजलधिसङ्गपत्तनो-
द्भूतसिद्धपरसिद्धिधाम यत् ।
श्रीपुरीव सुहृदर्थदर्शित-
त्यागराजविटनाट्यसाक्षि यत् ॥ १५ ॥

एतदाधिपुरकार्यकृत्सभा-
मण्डितं मणलिनाम धाम यत् ।
पल्लवस्स नरसिंहविष्णुर-
प्यग्रहारमकरोन्निजाख्यया ॥ १६ ॥

आलयादिवरधर्मभर्मसत्-
त्सम्प्रदायमिति पूर्वकालतः ।
तन्मणल्यभिजनो जनोऽखिलो
जन्मसिद्धमवहद्गुणं यथा ॥ १७ ॥

नेतृभूतजनमग्रणीरिति
प्राहुरग्रिमतया प्रवृत्तिषु ।
द्राविडा अपि यमेव भाषया
व्याहरन्ति मुदलीति संज्ञया ॥ १८ ॥

तादृशी मुदलियार्परम्परा
काप्यभून्मणलिमण्डनायिता ।
मुद्दुकृष्ण इति तत्कुलाम्बुधा-
वग्रणीस्समभवत्कलानिधिः ॥ १९ ॥

तत्कुलस्य महतो महत् स्वकं
भूमिपण्यकनकादि नैकधा ।
केवलं मणलिसीम्नि नाभवत्
किन्तु चोलभुवि पत्तनेऽपि च ॥ २० ॥

पण्यवृत्तिमवलम्ब्य भारते
तत्र तत्र विनिवेशितापणाः ।
भूरिराजकमिथोविरोधज-
च्छिद्रवर्धितमहीतृषः क्रमात् ॥ २१ ॥

शस्त्रवृत्तिमुपसेव्य खण्डशः
भारतक्षितिमभक्षयन्निमाम् ।
ये मिथः कलहिनोर्बिडालयोः
पूपिकां कपटवानरो यथा ॥ २२ ॥

तेऽतिदूरगतपश्चिमाम्बुधे-
राङ्ग्लदेशत उपागता इह ।
चेन्नपत्तनपदे तदाभवन्
स्वीयसालमुपकल्प्य जिष्णवः ॥ २३ ॥

पण्यराज्यविविधप्रवृत्तिषु
स्वोपकारविधये न्ययोजयन् ।
तेऽस्मदीयजनमुख्यनायकं
कञ्चन प्रभुवरं द्विभाषिणम् ॥ २४ ॥

मद्रहूणकनिवेशनाधिपो
जार्ज् पिगाटिति बभूव यस्तदा ।
मुत्तुकृष्णमणलीश्वराय स
स्थानमग्रिममिदं व्यतीतरत् ॥ २५ ॥

चन्द्रगिर्यधिपचेन्ननायको
यत्र वारिधितटे विनिर्ममे ।
चेन्नकेशवविभोर्वरालयं
पत्तनं तदभिधं च नूतनम् ॥ २६ ॥

हूणनाविकवणिग्भिरागतैः
तत्र दुर्गरचनेच्छुभिः क्रमात् ।
अस्मदीयजनदेवसन्निधिः
नाचिरात् परिजिहीर्षितो हठात् ॥ २७ ॥

एकदाथ सहसाखिलान् जनान्
केवलं न निरवासयन् बहिः ।
किंतु हन्त निरमूलयन् च ते
चेन्नकेशवविभोस्तदालयम् ॥ २८ ॥

एतदालयविनाशदुष्कृतं
मुत्तुकृष्णमुदलिर्न चक्षमे ।
सद्य एव स नवालयान्तर-
स्थापनार्थमुदयुङ्क्त चाधिकम् ॥ २९ ॥

स्वीयमित्रविभवैरदूरतो
द्वे चकार सुरधामनी जवात् ।
चेन्नमल्लशिवचेन्नकेशवौ
यत्र साम्प्रतमपि स्थिरास्पदौ ॥ ३० ॥

धमधूर्वहमणल्यधीश्वरः
स्वद्विभाषिपदगौरवादथ ।
हूणनेतुरपि वित्तमग्रहीत्
वार्षिकं स्वसुरधामवृत्तये ॥ ३१ ॥

एवमेव बहवः प्रभूत्तमा-
श्चेन्नपत्तनमलंकरिष्णवः ।
रेजिरे हरिहरादिदेवता-
स्थानधर्मपरिपालने रताः ॥ ३२ ॥

सर्व एव धनिका इमे यथा
धर्म आदरमदर्शयन्निजम् ।
तद्वदेव रसिका अपोषयन्
गाननाट्यचतुरान् कलावतः ॥ ३३ ॥

नित्यसेवितचिदम्बरेश्वर-
श्रीलवेदगिरिणा हि मानितौ ।
गायकप्रकरनायकावुभौ
श्रीनिवासदुरसामिनामकौ ॥ ३४ ॥

त्यागराजगुरुसुण्ठिसुब्बभू-
वेङ्कटाद्रिरमणश्च सत्कृतः ।
श्रीप्रवालपथकृष्णसेविना
पिण्डिकूटिपदवेङ्कटाद्रिणा ॥ ३५ ॥

कोपुरप्रमुखसुन्दरश्च य-
स्त्यागराजमतिथिं समर्चयत् ।
रेजुरेवमपरेऽप्यधीश्वरा
देवनायककलिङ्गरायवत् ॥ ३६ ॥

सर्वपत्तनविभूतिमानसौ
मुत्तुकृष्णमणलीशपुङ्गवः ।
भक्तिधर्मरसवत्त्ववैभवै-
रत्यशेत सचिवः सितेशितुः ॥ ३७ ॥

चोलसीमगतनैजभूधनं
पर्यवेक्षितुमथैकदा स च ।
प्राप पापहरसह्यजातटी-
मालयावलिपुनःपवित्रिताम् ॥ ३८ ॥

क्षेत्रमङ्गकलमाढ्यमात्मनः
द्रष्टुमेष यदगान्मृषैव तत् ।
क्षेत्रमेव कमलाढ्यमात्मनः
तत्प्रसिद्धमवलोकितुं गतः ॥ ३९ ॥

स्वाधिपत्तनविराजमानत-
त्यागराजविभुमूलमूर्तिमत् ।
भक्तसुन्दरपरीमलीकृतं
श्रीपुरं चिरदिदृक्षुरास सः ॥ ४० ॥

आप्लुतेन कमलालयाम्भसि
त्यागराजभगवत्सिषेविषा ।
आत्मनः सुचिरकालसम्भृता
तेन किञ्चिदिव पर्यपूर्यत ॥ ४१ ॥

हंसनृत्यमनवेक्ष्य तद्विभो-
र्दर्शनं कथमुपैतु पूर्णताम् ।
मुत्तुकृष्ण उदकण्ठतैव तत्
नानुभूय नयनामृतोत्सवम् ॥ ४२ ॥

क्षेत्रगौरवकथार्पितश्रवाः
चक्र आलयपरिक्रमं ततः ।
कञ्चन प्रतिपदं प्रदर्शितं
प्रैक्षतैष च विशेषमादरात् ॥ ४३ ॥

वासरेऽथ समनन्तरे विभोः
तत्प्रसिद्धमुचुकुन्दपूजनम् ।
विस्तरेण निरवर्तयत्ततो
विद्वदर्हणसदोऽप्यमेलयत् ॥ ४४ ॥

'भावरागलयरूपपुत्रकैः
मूर्तगेयनिगमाभ एष सः ।
श्रीरमानगररामदीक्षितः
नूनमत्र भवतः श्रुतिं गतः' ॥ ४५ ॥

इति सदसि निवेदितस्स कैश्चिन्
मणलिविभुः पुलकाञ्चिताङ्गयष्टिः ।
तनयसहितरामदीक्षितेन्द्रं
परिहृतविष्टर आदरादगृह्णात् ॥ ४६ ॥

'यूयं न केवलमतीव मनोज्ञगानाः
वाग्गेयकारतिलका इति च श्रुतं मे ।
शुश्रूषुरस्मि भवतां नवगेयबन्धान्
एतद्भवत्तनयगानविदग्धतां च' ॥ ४७ ॥

इत्यर्थितः प्रभुवरेण तदा स राम-
स्वामी मखी सुरुचिरं स्वयमाललाप ।
स्वोपज्ञमेव कमलेश्वरनृत्तनाम
हंसध्वनिं दधत औडुवनूत्नरागम् ॥ ४८ ॥

तद्रागसञ्चरणपुष्कलदर्शनाय
स्वेनैव निर्मितमथ प्रवरं प्रबन्धम् ।
पुत्रं तमग्रजमगापयदध्वरीन्द्रः
स्वान्ये कृती तदनुजौ तदनन्तरं च ॥ ४९ ॥

मणलिविभुरमीषां गानमाध्व्यातिमत्तो-
र्धनमतिबहु दत्वाप्यांप्ततृप्तिर्न, सद्यः ।
सतनयमखिनोऽस्य स्वात्मनैवानुयानं
निजपदसहवासं चाप्यसौ निर्बबन्धं ॥ ५० ॥

श्रीत्यागराजचरणाम्बुजचञ्चरीक-
श्रीपत्तनाभिजनराघवनिर्मितेऽस्मिन् ।
श्रीदीक्षितेन्द्रचरिते मणलीशमुख्य-
सख्यप्रपञ्चकरपञ्चमसर्ग एवम् ॥ ५१ ॥

इति श्रीश्रीनगराभिजनकौशिक-श्रीराघवशर्मणा
विरचिते श्रीमुत्तुस्वामिदीक्षितचरिते
मणलीशमुख्यसख्यं नाम पञ्चमस्सर्गः ॥

॥ अथ षष्ठस्सर्गः ॥

अधिपत्तनसामीप्यात् त्यागेशविरहव्यथाम् ।
अपाकरिष्णौ मणलौ श्रीरामस्वामिदीक्षितः ॥ १ ॥

मुत्तुकृष्णप्रभुप्रेमप्रकर्षपरतन्त्रितः ।
कमप्यनेहसं वासं बबन्ध सकुटुम्बकम् ॥ २ ॥

मुत्तुकृष्णेऽथ कालेन कीर्तिशेषे तदात्मजः ।
श्रीमान् वेङ्कटकृष्णाख्यो बभूव कुलनायकः ॥ ३ ॥

सत्येव जनके तत्तत्कार्यनिर्वाहगौरवात् ।
कनीयोयज्ञमानं यं चिन्नय्येति जना विदुः ॥ ४ ॥

पितुरन्यूनमहिमा कुलक्रमसमेयुषाम् ।
अजागरीत् स सश्रद्धो धर्माणां परिपालने ॥ ५ ॥

विशिष्य स्वस्य गान्धर्वनैपुण्याभिनिवेशतः ।
गुरोरपि परं मित्रं बभूव स कलावताम् ॥ ६ ॥

परस्परप्रीतिबन्धः तद्दीक्षितकुटुम्बयोः ।
बभूव यस्स दृढतामगाहत दिने दिने ॥ ७ ॥

रामस्वामिमखीन्द्रोऽपि बह्वीर्निजकृतीर्नवाः ।
प्रेम्णा वेङ्कटकृष्णस्य नाम्नामोदत मुद्रयन् ॥ ८ ॥

शुश्रुवान् हूणगोष्ठीषु चिन्नय्यश्चेन्नपत्तने ।
पिडिल् नाम धनुस्तन्त्रीवाद्यं मुहुरमन्यत ॥ ९ ॥

"अनवद्यमिदं वाद्यं विपश्चिद्यदि कश्चन ।
अस्मत्कर्णाटसङ्गीतपद्धत्या साधयिष्यति ॥ १० ॥

'तदा कियच्छोभनं स्याद्' इत्यमुं च मनोरथम्।
कदाचिदाविरकरोत्स रामस्वामियज्वने ॥ ११ ॥

"पूर्वमस्माकमप्यासन् वीणाश्चापेन वादिताः।
एवं च शार्ङ्गदेवाद्यैर्ग्रन्थेषु प्रतिपादितम् ॥ १२ ॥

आनयाद्यैव तद्वाद्यं हूणं चानूनपाटवम्।
बालुस्वाम्येष नः पुत्रो नचिरात्साधयिष्यति" ॥ १३ ॥

इति श्रीदीक्षितेन्द्राणामुत्तरादुत्तरक्षणे।
हूणातोद्यविदे भद्रे संदिदेश स चिन्नयः ॥ १४ ॥

कर्णाटविदुषो हस्तं समासाद्य नवान्नवान्।
वाद्यं तद्वयञ्जयामास हूणविस्मापनान्नयान् ॥ १५ ॥

चिन्नय्यप्रभुबालुस्वाम्युपज्ञमिदमैधत।
अपश्चिमं पश्चिमानां वाद्यं कर्णाटकीकृतम् ॥ १६ ॥

अथैकदा स्वभवने कस्मिन्नपि महोत्सवे।
सुहृत्प्रभृणां सर्वेषां समवाये समागते ॥ १७ ॥

वृद्धं वेङ्कटकृष्णोऽसौ दीक्षितेन्द्रं व्यजिज्ञपत्।
महतीमर्हणां तस्य विधित्सुर्गायकेशितुः ॥ १८ ॥

'अष्टोत्तरशतापूर्वतालरागार्णवायितः।
प्रबन्धराजो भवतां योऽचिरात्पूर्तिमागतः ॥ १९ ॥

तेनानेकतलोत्तुङ्गमहागोपुरशोभिना।
इमान् रसज्ञानाचार्य विस्मापयितुमर्हसि' ॥ २० ॥

इति चिन्नय्यवाक् तत्र मनांसि समितौ सताम् ।
उल्लासयामास सरस्यम्बुजान्यनिलो यथा ॥ २१ ॥

'स्वयं विशेषवेत्तारस्सर्व एवेश्वरा इमे ।
एकैकेनं च सम्प्राप्ता अत्र गायकनायकाः ॥ २२ ॥

ईदृग्गुणज्ञा समितिर्भाग्यादासादिता मया ।
श्रुत्वा शिरः कम्पतें चेत् कान्या भवतु सत्क्रिया' ॥ २३ ॥

इत्युदारमुदीर्याथ दीक्षितः शिक्षितान् सुतान् ।
तन्महाकार्यनिर्वाहसाह्याय समवैक्षत ॥ २४ ॥

मुत्तुस्वामी निजां वीणामासार्य समनह्यत ।
धनुर्वाद्यविशेषेण बालुस्वाम्यप्युपाविशत् ॥ २५ ॥

तालजाग्रत्करश्चिन्नस्वामी पार्श्वमशिश्रियत् ।
मार्जयामासतुश्चाग्रे मृदङ्गं वादकावुभौ ॥ २६ ॥

कथमेकप्रयत्नेन शक्यनिर्वाह ईदृशः ।
प्रबन्धराजस्तद्गानसत्रं नैकदिनान्यभूत् ॥ २७ ॥

कण्ठास्तन्त्रीवदवदन् तन्त्र्योऽपि बत कण्ठवत् ।
पिकवन्मेघवन्नादो विविधाद्भुत उद्ययौ ॥ २८ ॥

नवानां रागतालानामुद्ग्राहे प्रतिखण्डतः ।
रासिक्येन मिथो वीक्ष्य चमच्चक्रे सदोगतैः ॥ २९ ॥

नाददुग्धाब्धिकल्लोलडोलालालितमानसाः ।
तस्य गन्धर्वगानस्य समाप्तिं नाबुधन् बुधाः ॥ ३० ॥

वाचा केचन बाष्पेण रोमाञ्चेन च केचन ।
व्यञ्जयामासुरानन्दमात्मनो दीक्षितान् प्रति ॥ ३१ ॥

चिन्नय्यात्तु प्रभुमणेः स हर्षो निरभिद्यत ।
हेमवर्षात्मना येन रामयज्वाभ्यषिच्यत ॥ ३२ ॥

प्रशंसानां सुवर्णौघैर्विद्वद्धी रामयज्वनः ।
स सुवर्णाभिषेकश्च नीतो द्विगुणतां तदा ॥ ३३ ॥

तत्रैव मणलिग्रामे वसत्स्वेतेषु यज्वसु ।
आगच्छद्वेङ्कटमखिप्रवरः कोऽपि गायकः ॥ ३४ ॥

मेलद्विसप्ततौ तेन वेङ्कटाध्वर्युपक्रमे ।
कस्यापि जन्यरागस्य दर्शयित्वाथ मूर्छनाम् ॥ ३५ ॥

'को नु रागविशेषोऽय'मिति पृष्टः परीक्षितुम् ।
रामस्वामिमखी प्राह रागनाम न केवलम् ॥ ३६ ॥

तामेव मूर्छनां किञ्च समादाय नवं पदम् ।
जगौ 'नन्नु परीक्षिञ्चे'त्यान्ध्रवाण्याशुगायनः ॥ ३७ ॥

श्रुत्वैतद्राममखिनो विद्याया आगमक्रमम् ।
ज्ञात्वा स विस्मयी पूर्वं विस्मयो मुमुदेऽथ ह ॥ ३८ ॥

यत आगन्तुको विद्वान् बुबुधे रामदीक्षितम् ।
वेङ्कटाध्वरिवंशीयशिष्यत्वेन सहोदरम् ॥ ३९ ॥

किन्दुबिल्वसमुद्रोत्थरोहिणीरमणायितैः ।
पद्मावतीसुचरणचारणे चक्रवर्तिभिः ॥ ४० ॥

श्रीराधामाधवरहःकेलिसंलीनमानसैः ।
गान्धर्वविष्ण्वनुध्यानशृङ्गाररसचुञ्चुभिः ॥ ४१ ॥

भोजराजभागधेयैर्जयदेववराभिधैः ।
गीतगोविन्दविख्यातः प्रबन्धो यैर्विनिर्मितः ॥ ४२ ॥

रागप्रबन्धजातीनां वैचित्र्येणोज्ज्वलीकृतः ।
वैदर्भीकैशिकीश्लक्ष्णसाहित्यातीवसुन्दरः ॥ ४३ ॥

अष्टाङ्घ्रिगीतबद्धत्वादष्टपद्यभिधां गतः ।
लास्यगोष्ठीषु यस्यैव समुपादेयता परा ॥ ४४ ॥

यस्यानुकारा अर्वाचां गेयकाव्यानि जज्ञिरे ।
शैववैष्णवशाक्तानि जैनान्यपि परञ्शतम् ॥ ४५ ॥

अवर्धन्त पथा यस्य प्रबन्धा नाट्ययोगिनः ।
यक्षगानकथाकेलिप्रमुखा देशवाङ्मयाः ॥ ४६ ॥

मठेभ्यो भजनार्थेभ्यो निर्यन् भागवतव्रजात् ।
पुण्यो यद्गाननिध्वानो दिशामस्यत्यमङ्गलम् ॥ ४७ ॥

अस्य विद्याविनीतश्रीजयदेवमहाकवेः ।
उदारगीतिसरणिप्रणिधानसमीरितः ॥ ४८ ॥

शिवगीतीमालिकेति प्रबन्धः प्रथितोऽस्ति हि ।
चन्द्रशेखरपूज्याङ्घ्रिसरस्वत्यास्सरस्वती ॥ ४९ ॥

श्रीसत्यव्रतनामाङ्कदिव्यक्षेत्रस्य सीमसु ।
जाते यवनभूकम्पे प्राप यस्सह्यजातटम् ॥ ५० ॥

श्रीकाञ्चीकामकोट्याख्यः पीठराजः पुरातनः ।
स्थापितो भगवत्पादैरादिशङ्करदेशिकैः ॥ ५१ ॥

वैनाशिनाशिभिर्वेदनादोद्बोधविधायिभिः ।
षण्मतस्थापनप्राप्तश्रीजगद्गुरुगौरवैः ॥ ५२ ॥

अलंकरिष्णोस्तत्स्थानं कुम्भघोणमहास्थले ।
कवेः परमहंसस्य नादानुभवयोगिनः ॥ ५३ ॥

तेषामाचार्यवर्याणां श्रीमुखेन प्रचोदितः ।
रामस्वामिमखी रागतालादेः क्लृप्तिपूर्वकम् ॥ ५४ ॥

तां नित्यपूजाङ्गतया शिवगीतिसुमालिकाम् ।
श्रीपुरे त्यागराजस्य गापयामास सन्निधौ ॥ ५५ ॥

आगोविन्दपुरावासाद् भजनाध्वातिसंस्तवात् ।
बाल्यादेवास्य मखिनः बभूव वदने सदा ॥ ५६ ॥

सर्वमष्टपदीगानं विशुद्धं सम्प्रदायतः ।
प्रत्यैकादशि तस्यैष चक्रे पारायणं मखी ॥ ५७ ॥

कालेनैतावता रामस्वामिनः कृतयः पराम् ।
प्रतिष्ठामभजन् भूरिसाङ्गीतिकपरिग्रहात् ॥ ५८ ॥

चत्वारिंशद्रागमाला मीनाक्षीस्तुतिरूपिणी ।
हिन्दोले रीतिगौले च मनोहर्यां विनिर्मिताः ॥ ५९ ॥

पूर्णायां चन्द्रिकायां च वर्णबन्धा विलम्बिनः ।
शङ्कराभरणे तानवर्ण एवमनेकशः ॥ ६० ॥

अथैकदा तु देवस्य दुर्विपाकादकाण्डतः ।
अन्धो बभूव तत्सूनुश्चिन्नस्वामी द्वितीयकः ॥ ६१ ॥

दुर्गाहरिहरस्वामीदुरूहबहुरूपभाक् ।
अध्यास्य वृषशैलं यः 'कलौ वेङ्कटनायकः' ॥ ६२ ॥

इति प्रसन्नवरदप्रथां बिभ्रत् प्रकाशते ।
तमुद्दिश्य विधायैष प्रार्थनां रामदीक्षितः ॥ ६३ ॥

आदाय नष्टनयनं चिन्नस्वामिनमात्मजम् ।
प्रययौ सप्तशैलेशश्रीनिवासदिदृक्षया ॥ ६४ ॥

विश्वरूपाख्यमौषस्यं प्रशस्यं दर्शनं विभोः ।
स्वामिपुष्करिणीस्नातो दीक्षितोऽनुबभूव ह ॥ ६५ ॥

सिंहाङ्कभित्तिप्राकारप्रदक्षिणविधेः परम् ।
स महामण्टपे यज्वा निषसाद तनूभुवा ॥ ६६ ॥

तस्य निध्यायतो बिल्वमालाविभ्राजितं विभुम् ।
बृहती निर्ययौ वक्त्राद् रागमाला विभूचिता ॥ ६७ ॥

उपावसद्वासरान् स चत्वारिंशच्च पञ्च च ।
उपगायन् प्रतिदिनं रागेणैकेन तं प्रभुम् ॥ ६८ ॥

'मनसा वेरितरुल दलचे'ति पदैर्विभुम् ।
यद्भासा भाति सर्वं तं पुत्रदृष्टिमयाचत ॥ ६९ ॥

रागमाला विरुरुचे वनमालेव सा हरेः ।
चत्वारिंशत्तथाष्टौ च यस्यां रागा रराजिरे ॥ ७० ॥

तस्या गुच्छायिता 'मिङ्क दये'ति कृतिमुत्तमाम् ।
रागेण वेगवाहिन्या जगौ चान्ते स दीक्षितः ॥ ७१ ॥

सौरमष्टाक्षरं मन्त्रं विद्यां चाक्षुष्मतीमपि ।
आदित्यहृदयं चैव त्रिसन्ध्यं प्रतिवासरम् ॥ ७२ ॥

चिन्नस्वामी स पुत्रश्च भास्कराभिमुखं स्थितः ।
जजाप जगतां चक्षुः प्रार्थयंश्चक्षुरात्मनः ॥ ७३ ॥

अथैवं मण्डलं क्षेत्रवासे सम्यगनुष्ठिते ।
चिन्नस्वामिदृशोरद्धा प्रकाशः पुनरागमत् ॥ ७४ ॥

स्वतो राजमानाः स्वरा नाम नूनं
स्वयं सच्चिदानन्दरूपादनूनाः ।
तदाराधितास्साधु साधोरमी ते
दुहन्त्येव कामान् समस्तान्न चित्रम् ॥ ७५ ॥

अथ स मणलिग्रामं रामाध्वरी पुनरागतः
कमपि न बहुं कालं स्थित्वा मणल्यधिपान्तिके ।
अभिलषितवान् प्रत्यागन्तुं निजां कमलापुरीं
मरणमुदितं यस्यां नूनं पुनर्भवनाशनम् ॥ ७६ ॥

'प्रतिदिनमवसादो वर्धते मे शरीरे
जिगमिषुरहमस्मि श्रीपुरं देह्यनुज्ञाम्' ।
इति मणलिविभुस्तं प्रार्थयन्तं मखीन्द्रं
कथमपि विरहेण व्यग्र एवान्वजानात् ॥ ७७ ॥

काञ्चीं चिदम्बरमवेक्ष्य मयूरलङ्घी
श्रीपत्तनाध्वनि पदं पुलकेन तन्वन् ।
त्यागेशगोपुरविलोकनफुल्लचित्तः
स्वं वेश्म वायुदिशि स प्रविवेश यज्वा ॥ ७८ ॥

पुनरपि कमलालयाभिषेकैः पुनरपि हंसनटस्य दर्शनैश्च ।
पुनरपि वपुरस्य जीर्यमाणं किमपि बभाविव तद्युवायमानम् ॥

महमिन्दुसहस्रदर्शनं सुतनिर्वर्तितमाप्तवान् मखी ।
स तदेकसुधांशवे परं हरचूडामणये स्पृहां दधौ ॥ ८० ॥

अथ निरघसुमाघमासि धातौ
शरदि भवस्स भवस्य मूलधातुः ।
मखिवरमिममात्मसादकार्षीत्
असुलभतन्निजरात्रिपुण्यकाले ॥ ८१ ॥

श्रीत्यागराजचरणाम्बुजचञ्चरीक-
श्रीपत्तनाभिजनराघवनिर्मितेऽस्मिन् ।
श्रीदीक्षितेन्द्रचरिते गुरुमुक्तिसूक्ति-
'मुत्तायितः' प्रथत एष च षष्ठसर्गः ॥ ८२ ॥

इति श्रीश्रीनगराभिजन - कौशिकश्रीराघवशर्मणा
विरचिते श्रीमुत्तुस्वामिदीक्षितचरितें
गुरुमुक्तिर्नाम षष्ठस्सर्गः ॥

॥ सप्तमः सर्गः ॥

स्वर्याते स्वे तातपादे कुटुम्ब-
स्वामी मुत्तुस्वामिनामाग्रजातः ।
जातो ह्येष श्रेष्ठ आसीद्गुणानां
सम्पत्त्यापि स्वीयतातातिशायी ॥ १ ॥

तच्च स्वाम्यं केवलं नो कुले स्वे
किन्तु प्राप्तं गेयविद्वत्कुलेऽपि ।
गीते वाद्ये शास्त्रसाहित्यशक्त्यो-
र्मुत्तुस्वामी सर्वमुख्यो बभूव ॥ २ ॥

मुत्तुस्वामिभ्रातरौ तौ तदीयान्
नूत्नान् रत्नीभूतसाहित्यबन्धान् ।
गायं गायं तद्यशो गीतगोष्ठी-
ष्वातेनाते वायुवत्पुष्पगन्धम् ॥ ३ ॥

चिन्नस्वामी रागगाने विशेषात्
भावस्फूर्त्या सुप्रसिद्धो बभूव ।
रागा ह्यस्मद्देयसर्वस्वभूताः
रागैस्सम्यक् साधितैः किं न साध्यम् ॥ ४ ॥

रागा आविर्भाविताः पूर्णभावै-
रात्मग्रन्थीन् दुर्भिदानङ्ग भित्त्वा ।
मग्नान् नादानन्दसौन्दर्यभूम-
न्यस्मान् जीवन्मुक्तसिद्धिं नयन्ति ॥ ५ ॥

चिन्नस्वामिन्यालपत्येकदास्मिन्
रागं रम्यं नागपूर्वां वरालिम् ।
नागस्साक्षादेत्य मध्येसमाजं
नृत्यन्नासीदुत्फणो यावदन्तम् ॥ ६ ॥

को वा तोडीकीर्तनं 'गानलोले'-
त्येतस्य श्रीनारदस्तोत्ररूपम् ।
नो जानीते गातृभिर्यस्य सम्प्र-
त्यप्युद्ग्राहः पल्लवीकृत्य गीतः ॥ ७ ॥

पित्रा साकं ते यदासन् मणल्यां
तस्मिन् काले चेन्नपुर्यां बभूव ।
पिण्डूकूरेर्वेङ्कटाद्रेस्सभायां
सुण्ठीसुब्बण्णात्मजो वेङ्कटाख्यः ॥ ८ ॥

स प्रख्यातो गायतां सार्वभौमः
तत्र प्राप्तो गातुमभ्यर्थितश्च ।
आलप्यातिप्राक्तनं टक्करागं
गीतं गात्वा तत्र तानं ततान ॥ ९ ॥

दाक्ष्यं दृष्ट्वा तस्य तस्मिन्नपूर्वे
रागे हृष्टे सर्वसामाजिकौघे ।
गाता किञ्चिद्गर्वतः प्राह 'सोऽयं
टक्को रागो द्रव्यमस्मत्कुलस्य' ॥ १० ॥

बालुस्वामी तत्र पित्रोपविष्टो
वृद्धेनोक्तं तच्च युक्तं न मत्वा ।

सद्यो गाति स्म स्वयं टक्कगीतं
सुण्ठीगूढस्वत्वमस्य व्यपास्यन् ॥ ११ ॥

बाले बालुस्वामिनि प्रेक्ष्य तादृग्-
ज्ञानप्रौढिं साधुगोष्ठ्यां वदन्त्याम् ।
हर्षावेशादामुमोचास्य कण्ठे
मुक्ताहारं मुत्तुकृष्णाग्रगण्यः ॥ १२ ॥

बालुस्वामी यच्च पूर्वं मणल्यां
चिन्नय्येशप्रेरणाच्चापवाद्यम् ।
पाश्चात्येभ्यस्साधयामास तस्मिन्
कीर्तिस्तस्य प्रासरत्तत्र तत्र ॥ १३ ॥

तज्ज्ञापुर्यां यो महाराष्ट्रभूपः
हूणातोद्ये कौतुकी शर्भजीति ।
तेनाश्रावि त्यागसेवागतेन
प्रावीण्यं तद्यज्वनो नूतनवाद्ये ॥ १४ ॥

श्रुत्वा वाद्ये तत्र वैदेशिके नः
कर्णाटीयां फक्किकामद्भुतेन ।
तेनातीव क्षोणिपालो जहर्ष
स्वास्थानीयान् पण्डितानाह्वयच्च ॥ १५ ॥

ब्वार्ट्स् नामा यः क्रैस्तवाचार्य आसीत्
शर्भोजिक्ष्मापालशिक्षाधिकारी ।
गेरिक् नामा तन्नियुक्तोऽस्य राज्ञो
हूणातोद्ये वर्धयामास वाञ्छाम् ॥ १६ ॥

गेरिक्द्वारा भूरिवित्तव्ययेन
क्रीतं कृच्छ्राद्दूरपाश्चात्यदेशात् ।
तत्तत् हूणातोद्यमेतेन राज्ञा
काले काले किंञ्च शुश्रूषितं तत् ॥ १७ ॥

श्रुत्वा बालुस्वामिनस्तद्वयोलिन्-
वाद्यं राज्ञा तेन चित्रीकृतेन ।
आहूतायां सर्वतो गातृगोष्ठ्यां
चत्वारस्ते भ्रातरश्चाप्यभूवन् ॥ १८ ॥

पोन्नय्याख्यश्चिन्नयाख्यस्तृतीयः
स प्रख्यातः श्रीवडीवेलुसंज्ञः ।
तुर्योऽप्यन्यः श्रीशिवानन्दनामा
धुर्यास्सर्वे नाट्यवित्सम्प्रदाये ॥ १९ ॥

तञ्जापुर्यां राजराजेश्वराख्ये
देवागारे श्रीबृहन्नायकाग्रे ।
पूजाकाले नाट्यसेवानियोगः
येषामासीद्वंशपारम्परीयः ॥ २० ॥

वर्णान् शब्दान् कीर्तनान्यप्यकुर्वन्
सर्वे ये वाग्गेयकारप्रधानाः ।
अद्यत्वे या प्रक्रिया देवदासी-
लास्ये प्राहुस्तां च यैरेव कल्पताम् ॥ २१ ॥

वञ्चिक्षोण्यां रामवर्मेति रेजे
गर्भश्रीमान् गर्भदासश्च विष्णोः ।

स्वातीजातो मौक्तिकस्वच्छकीर्ति-
र्योऽभूद्राज्ञां पण्डितानां च मुख्यः ॥ २२ ॥

दैव्या वाण्या पद्मनाभं तदाख्या-
मुद्राभद्रैश्चित्ररागप्रकाशैः ।
भावामोदैः कीर्तनैर्यः प्रसून-
स्तोमप्रख्यैरर्चयामास नित्यम् ॥ २३ ॥

तेनास्थानीमात्मनः प्रीतिभाजा
सारज्ञेनाहूय संमान्यमानः ।
येषां मध्ये श्रीवडीवेलुनामा
वञ्चीं गेयैर्वर्धयन्नध्युवास ॥ २४ ॥

तं तन्मध्ये केतुभूतं वडीवेल्-
नामानं क्ष्मापाल आहूय चाह ।
एतद्धालुस्वामिनोऽस्मान्नवीनं
पाश्चात्यानां वाद्यकं साधयेति ॥ २५ ॥

आज्ञां राज्ञो मानयन् मानगर्भा-
मन्तेवासी यज्वनोऽसौ वडीवेल् ।
स्वल्पैरेवाहोभिरासीदहो स
प्राज्ञस्तस्मिन् वाद्यके सिद्धहस्तः ॥ २६ ॥

एवद्धालुस्वाम्युपज्ञे वयोलिन्-
वाद्ये श्रुत्वा तद्वडीवेलुशिल्पम् ।
हर्षात् स्वातीभूभुजा दत्तमस्मै
तस्यातोद्यस्याद्भुतं दन्तशिल्पम् ॥ २७ ॥

दृष्ट्वा श्रुत्वा श्रीवडीवेलुदाक्ष्यं
पश्चादन्येऽप्यादुर्वाद्यमेतत् ।
राज्ञस्सभ्यः श्रीवराहाप्पयार्यः
सुब्बरायो रामकृष्णः शिवादिः ॥ २८ ॥

हूणातोघे यद्वदेवं स धीमान्
कर्णाटीयोदीच्यवाद्ये समस्ते ।
वीणासीतार् स्वर्बदाद्ये मृदङ्गे
बालुस्वामी दीक्षितः शिक्षितोऽभूत् ॥ २९ ॥

स्वीयां विद्यां दर्शयन्तौ सभासु
ज्येष्ठभ्रातुः ख्यापयन्तौ कृतीश्च ।
बालूचिन्नस्वामिनौ स्वामिदृष्ट्यै
क्षेत्रात् क्षेत्रं जग्मतुः श्रीपुरीतः ॥ ३० ॥

गत्वा तञ्जाराजधानीं त्रिशीर्ष-
स्थानं पश्चात्पाण्ड्यभूपालधानीम् ।
श्रीमीनाक्षीसुन्दरक्षेत्रवर्यं
भेजातेऽथो दीक्षितभ्रातरौ तौ ॥ ३१ ॥

तस्यां पुर्यां तिष्ठतोः स्वीयगेयैः
देवीं विज्ञान् धिन्वतोर्भूमिपं च ।
ज्यायान् दैवादेतयोर्दुर्विपाकात्
चिन्नस्वामी हन्त दिष्टान्तमापत् ॥ ३२ ॥

चत्वारिंशत् पञ्च च प्राप्य वर्षान्
चिन्नस्वामी बाल एव स्वर्गीतिम् ।

पोतीकृत्योत्तीर्य संसारवार्धिं
देव्याः श्रीमत्पादमूलं प्रपेदे ॥ ३३ ॥

त्यक्तो भ्रात्रा त्यक्तुमेतद्वियोग-
श्रान्तिं बालुस्वामियाजी जगाम ।
सेतुं सीताशोकविच्छेदहेतुं
संसाराम्भोराशि सन्तारहेतुम् ॥ ३४ ॥

प्रत्यागच्छन् रामनाथावलोकात्
बालुस्वामी श्रीमदेडुप्पभूपैः ।
प्रेम्णाहूतः प्रापितस्सर्वपूजाः
स्वीयास्थाने स्थातुमभ्यर्थितश्च ॥ ३५ ॥

राज्ञो हर्षं हूणवाद्येन तन्वन्
भ्रात्रोर्गायन् गेयबन्धान् मनोज्ञान् ।
कुर्वंश्च स्वान् नूतनान् स प्रबन्धान्
एडुय्याख्यां तत्पुरीमध्युवास ॥ ३६ ॥

आन्ध्रया वाण्या तालमादिं गृहीत्वा
(आन्ध्रीं वाणीमादिमादाय तालं)
दर्बार् रागं रागरुद्रप्रियां च ।
रूपं तालं किञ्च रागं वसन्तं
दर्वित्युक्तान् नाटचयुक्तान् प्रबन्धान् ॥ ३७ ॥

कीर्तिं स्तोतुं श्रीकुमारेडुपेन्द्रोः
नाटे चाटे तानवर्णं ततान ।

प्राणैषीत् त्रीन् वेङ्कटेशेड्डपेन्द्र-
क्षोणीपालस्तोत्रबन्धांस्तथैव ॥ ३८ ॥

द्रष्टुं गच्छन्नेकदा गृध्रशैल-
स्कन्दं भावस्कन्नचेता नुनाव ।
रूपे सारङ्गे च रुद्रप्रियायां
आदौ कन्नडयां च गीतत्रयेण ॥ ३९ ॥

शृण्वन् बालुस्वामितो ज्येष्ठयज्व-
श्रीमन्मुत्तुस्वामिनः कीर्तनानि ।
एड्डप्पेन्द्रो द्रष्टुमुत्कण्ठमानः
स्वास्थानीं त ज्येष्ठमप्याजुहाव ॥ ४० ॥

श्रीत्यागराजपदपङ्कजचञ्चरीक-
श्रीपत्तनाभिजनराघवनिर्मितेऽस्मिन् ।
श्रीदीक्षितेन्द्रचरितेऽनुजचिन्नबालु-
स्वामिप्रथाकथकसप्तमसर्ग एवम् ॥ ४१ ॥

इति श्रीश्रीनगराभिजन - कौशिकश्रीराघवशर्मणा
विरचिते श्रीमुत्तुस्वामिदीक्षितचरिते
चिन्नबालुस्वामिप्रथा नाम सप्तमस्सर्गः ॥

॥ अष्टमः सर्गः ॥

पिता यदा राममखी सभार्यः
पुत्रीयमाणो नियमं चचार ।
वैद्येशितुर्धाम्नि तदा किलायं
स्वप्नो मखीन्द्रस्य बभूव भव्यः ॥ १ ॥

कृतार्धयामेश्वरदर्शनस्य
तस्योपवासक्लमजातसुप्तेः ।
करे पुरोभूय विभुस्स हारं
न्यधात्सुधांशूपममौक्तिकानाम् ॥ २ ॥

मुक्तावली मुत्तुकुमार एवे-
त्यतीव हर्षान्मखिना गृहीता ।
पुत्रं भविष्यन्तमसूचयत् किं
सद्गीतिमुक्तावलिगुम्फदक्षम् ॥ ३ ॥

साहित्यसङ्गीतविभोर्विभूतिः
तादृङ्महापण्डितलब्धजन्मा ।
वाग्गेयकारेषु कथं स मुत्तु-
स्वामी न विन्देत वरिष्ठनिष्ठाम् ॥ ४ ॥

यदा मणल्यामवसत्स राम-
स्वामी चिनय्येन कृतातिथेयः ।
तदाधिपुर्यां कृतदेवसेवः
समागमत्कंश्चन मस्करीन्द्रः ॥ ५ ॥

चिदम्बरस्वाम्यभिधां दधानो
माधुव्रतीं वृत्तिमसौ प्रपन्नः ।
नादेन नेदीय उपेत्य सत्यं
बभ्राम तीर्थानि गतभ्रमोऽपि ॥ ६ ॥

तं नादवेदाभिनिवेशमेषां
शीलं पितुः प्रश्रयमात्मजानाम् ।
विलोक्य चर्यां च विलङ्घ्य तत्र -
स्थातुं स कश्चित्सममंस्त कालम् ॥ ७ ॥

विशेषतो ज्येष्ठकुमारवक्त्र-
वर्चो वशी वीक्ष्य वशीकृतोऽभूत् ।
आतायतातीव तयोर्हि तारा-
मैत्रीमिथस्तत्प्रथमावलोकात् ॥ ८ ॥

कार्यं महत्कर्तुमलं गुणेन
जातोऽपि कंचित् समपेक्षतेऽत्र ।
उद्बुद्धये प्रत्ययमुत्तमं स
प्रायः स्वयं देशिकरूप एति ॥ ९ ॥

एवं यदृच्छामिव तत्त्वतस्तु
सङ्कल्पमेवानुसरन्त ऐशम् ।
महान्त आगन्तव आत्मतेज-
स्तन्वन्ति कस्मिन्नपि पुंसि गुण्ये ॥ १० ॥

स क्षेत्रवित्क्षेत्रमदो विहाय
काशीं गमिष्यन् जनकं जगाद ।

मया सहायं प्रथमस्सुतस्ते
कालं कमप्यस्तु नयोनि किं नु ॥ ११ ॥

चित्रान् विदेशान्नदतीर्थदेव-
धामानि पुण्यानि च दर्शयानि ।
मया सहायास्यसि किं नु मुक्तु-
स्वामिन्निति प्राह सुतं च योगी ॥ १२ ॥

तस्मिन् मुनौ कौशिकवद्वरेण्ये
निनीषति ज्येष्ठकुमारमेवम् ।
पिता गतो दाशरथीं न शङ्कां
स्वयंवरां कः कमलां निषेधेत् ॥ १३ ॥

भवादृशामाप्तमनोरथाना-
मनुग्रहायैव भवन्ति भावाः ।
अर्हन्ति बालं भगवत्पदानां
शुश्रूषणायानुचरं विधातुम् ॥ १४ ॥

मणेरमुष्याकर एव सोऽहं
शाणायमाना भगवन्त एव ।
एनं निरेनोवरवृत्तरूप-
तेजोभिरुद्दीपयितुं समर्हाः ॥ १५ ॥

विज्ञाप्य विज्ञो यतिवर्यमित्थं
आहूय चाहाग्रसुतं स सुत्वा ।
वत्सैहि धन्योऽस्यनुयाहि याहि
सिद्धिं परां सिद्धपदानुसेवी ॥ १६ ॥

नूनं बहुज्ञोऽसि तथापि बुद्धिं
यात्रा विचित्रं विकचीकरोति ।
यद्ग्रान्थिकं ज्ञानमदो महात्म-
सम्पर्कतोऽन्यादृशमेति वीर्यम् ॥ १७ ॥

आचार्यवानेव हि वेद वेद-
स्तथानुशास्ति व्रज वत्स वृद्धचै ।
इतोऽपि संदृष्टपरावरेभ्य-
स्तव क्व लभ्येत गुरुर्गरीयान् ॥ १८ ॥

पिता प्रदाय प्रवरोपदेश-
पाथेयमेवं प्रथमं तनूजम् ।
शिरस्युपाघ्राय दिशामुदीचीं
प्रस्थापयामास यतीश्वरैस्तैः ॥ १९ ॥

तिरुत्तणिं चैव तिरुप्पदिं च
वटाटवीमूर्ध्वनटं च दृष्ट्वा ।
श्रीकालहस्तीशमथ प्रपद्य
कृष्णामकृष्णाध्वकरीमयाताम् ॥ २० ॥

स्थलात् स्थलं ताविति वीक्षमाणौ
प्रजग्मतुः शिष्यवरो गुरुश्च ।
आद्यान्तिमावाश्रमपूरुषार्थौ
उपात्तदेहाविव राजमानौ ॥ २१ ॥

स यानि पुण्याचरणानि बालः
चचार योगी च तथैव तानि ।

उक्तं नु यान्येव हि साधनानि
भवन्ति तान्येव हि लक्षणानि ॥ २२ ॥

बुद्धा अभेदार्थमबुद्धबुद्धेः
कर्मस्थलोकस्य च संग्रहार्थम् ।
वर्तन्त एवोत्तमकर्मयोगे
श्रेष्ठानुवृत्तिर्हि जनस्वभावः ॥ २३ ॥

उदारदेवायतनानि शैल-
वेलानदीतीरविभूषणानि ।
चित्तस्य कश्चिद्विरजस्तमस्कं
कुर्वन्ति सत्त्वातिशयप्रकाशम् ॥ २४ ॥

अध्यासितं साधकसिद्धसङ्घैः
पुरातनं विश्रुतसिद्धिधाम ।
श्रीपर्वतं सिद्धिमिवाधिरूढौ
व्यलम्बतां सानुषु तस्य किञ्चित् ॥ २५ ॥

विदेहजास्पर्शमवाप्य जन्तो-
र्विदेहतां स्पर्शयितुं प्रगल्भाम् ।
गोदावरीं पञ्चवटीं च नासा-
मासेदतुस्तावथ नर्मदां च ॥ २६ ॥

धर्मावनान्म्लेच्छजयात्समाख्या-
मवन्तिकामुज्जयिनीं वहन्तीम् ।
भुवं पुरीं चैव ततस्समेतौ
देवं महाकालमसेविषाताम् ॥ २७ ॥

निध्याय कृष्णस्य विलासिनोऽङ्गं
गतां तदाभां यमुनां तथैव ।
विलोकयन्तौ मथुरापुरीं तौ
भावेन कृष्णे मधुरीभवन्तौ ॥ २८ ॥

कुमारविष्णोस्सुकुमारपाद-
विन्यासधन्यव्रजभूरजांसि ।
वृन्दावनाकृष्टपदौ स्पृशन्तौ
बभूवतुः कण्टकिताखिलाङ्गौ ॥ २९ ॥

पुंसोः पुरा द्वन्द्वमदत्त यत्र
निर्द्वन्द्वहेतोर्वरयोगविद्याम् ।
हिमालयेनेव ययाद्य विश्व-
विख्यातया भारत उच्छ्रिरस्कः ॥ ३० ॥

'कुरुष्व कार्यं त्यज सङ्गमेवे'-
त्युच्चैः कुरुक्षेत्रमुदीरयत् तत् ।
नरस्स नारायण एव सोऽपि
प्राप्तौ पुनश्चैव समागतौ तौ ॥ ३१ ॥

"गीतां दधद्भागवतीं य आदा-
वन्ते च भैष्माण्यनुशासनानि ।
महानभूद्भारतसम्प्रहारः
सैषा स्थली बालक तस्य पश्य ॥ ३२ ॥

द्वावत्र देशे समरौ महान्तौ
लङ्काकुरुक्षेत्रभुवोः प्रवृत्तौ ।

कामार्थतर्षेण परस्वगृध्नो
मा मेति शङ्कं सततं धमन्तौ " ॥ ३३ ॥

इत्यूचिवान् दीक्षितबालकं स
योगी प्रतस्थे पुनरुत्तरेण ।
तीर्थं हरिद्वारमथाभ्युपेत्य
प्रदर्शयामास हिमाचलेन्द्रम् ॥ ३४ ॥

" गौरीगुरुस्सोऽयमितो हि गङ्गा
स आश्रमोऽस्मिन् बदरी च दिव्यः ।
सरश्च तन्मानसमत्र मोदा-
द्यस्मिन् रमन्ते परमाश्च हंसाः ॥ ३५ ॥

अलं बहूक्त्वा बत भावुकानां
मनस्समुन्नेतुमितोऽस्ति कोऽन्यः ।
यस्मिन् स साक्षाद्भगवान् महेशः
कैलासवासी सततं प्रसन्नः ॥ ३६ ॥

यो जात एवाप पितुर्गुरुत्वं
सेनापतित्वं च सुरारिनाशि ।
तृतीयमात्रार्थमयेन येन
तमामनन्ति प्रणवं च पूर्णम् ॥ ३७ ॥

जगज्जनित्रोः तपसः फलं सः
भवप्रसादाद् भवतोऽपि यस्य ।
प्रत्यद्रिलीलाकुतुकी कुमारः
तस्यायमेव प्रभवोऽद्रिरासीत् ॥ ३८ ॥

चिदम्बरस्वामिवचोभिरेभि-
रुदीरितान्तःकरणस्स शिष्यः ।
अभूयआवृत्तिसहात्तदद्रेः
स देशिकोऽथावृते कथंचित् ॥ ३९ ॥

त्रयीमिवानु त्रिपथामथेतौ
प्रयागमाजग्मतुरद्भुताख्यम् ।
जलाप्लवादेव जडस्य मुक्ति-
रित्येधते यत्र सदा प्रयागः ॥ ४० ॥

त्रिनाडिकाचक्रवदात्मशक्ति-
प्रदे त्रिवेणीजलसन्निपाते ।
निमज्य तौ तेन नवीभवन्तौ
वाराणसीमार्गमथाश्रयेताम् ॥ ४१ ॥

स स्वप्रकाशज्वलदात्मविद्वान्
तदाहितश्रीसुकुमारमूर्तिः ।
शिष्यस्स च द्वावपि सत्पथेन
यान्तावभातामिव पुष्पवन्तौ ॥ ४२ ॥

उपेत्य काशीं सततोपयात-
भक्तप्रवाहैर्धुनदीप्रवाहैः ।
द्विधापि कोलाहलितोत्तरङ्गां
जगाद योगी स कुमारकं तम् ॥ ४३ ॥

" अयं हि वत्साखिलभारतस्य
मतः प्रदेशो हृदयायमानः ।

ख्याता पुरीयं शिवराजधानी
विमुक्तिधामाप्यविमुक्तनाम ॥ ४४ ॥

"इहान्नपूर्णा जननी प्रजाना-
मन्नं परं ज्ञानमयं ददाति ।
भस्मीभवत्यत्र समस्तकर्मे-
त्येतत्समाहुश्च महाश्मशानम् ॥ ४५ ॥

अस्मिन् परानन्दवने विमुक्ता
मृगेन्द्रवत् स्वैरविहारभाजः ।
अत्रेश्वरस्तारकमन्त्रवादी
कर्णेजपोऽपोहति जन्तुमन्तून् ॥ ४६ ॥

पुरे पुरेह क्षितिपा अभूवन्
राजर्षयश्चाप्यवतारभूताः ।
बलाकिना ब्रह्मवदन्नजात-
शत्रुश्च धन्वन्तरिरादिवैद्यः ॥ ४७ ॥

मुहुर्मुहुर्मोहमदैर्हठेन
विध्वंसितं पूर्ववदुज्जिहानम् ।
विभाति विश्वेशितुरत्र धाम
लिङ्गं यथैवेश्वरनित्यतायाः" ॥ ४८ ॥

इत्थं गुरूद्बोधिततन्महत्व-
विस्तारविस्तारिमनस्क्रियोऽयम् ।

शिष्यः प्रहृष्यन् प्रविवेश काशीं
उपांशु काशीति च जज्ञपूकः ॥ ४९ ॥

'भो वत्स वत्स्याव इहैव कञ्चित्
कालं समक्षीकृतकालकालौ ।
कृताभिषेकौ मणिकर्णिकायां
महात्मनां संस्तवमीहमानौ ॥ ५० ॥

इहास्ति गङ्गाम्बुकणैस्सदैव
शीतश्च पूतश्च मठः पुरा यः ।
सदेशिकैरध्युषितो मदीयै-
र्यत्राद्य चिन्वन्ति तपस्सतीर्थ्याः' ॥ ५१ ॥

इत्यूचिवान् दत्तकरावलम्ब-
श्चिदम्बरस्वामिगुरुस्स शिष्यम् ।
मठं निनाय प्रविवेश शिष्टः
शिष्यस्स तं सिद्धिगुहामिव स्वाम् ॥ ५२ ॥

व्यतीतरद्वैष्णवशैवशाक्तान्
मन्त्रान् कुमाराय स देशिकेन्द्रः ।
ददौ यथावद्वरशाक्तदीक्षां
साकं चिदानन्दरहस्यनाम्ना ॥ ५३ ॥

नानाविधं साधनमात्मलब्ध्यै
महासनस्तत्र निषेवमाणान् ।

उपास्य तत्तत् स बुबोध बालः
चिदम्बरच्छात्र इति प्रतीतः ॥ ५४ ॥

अभीक्ष्णमेकाकितयाभ्रसिन्धो-
र्बभ्राम घट्टेषु स पावनेषु ।
जगाम धामानि कबीररामा-
नन्दादिमानां महतां महान्ति ॥ ५५ ॥

सन्ध्यासु सन्ध्याय च सिद्धसिन्धोः
प्रवाहलक्ष्मीं स मुहुर्मुमोहः ।
प्रोवाह तस्माद्रसनाग्रदग्ध-
रसात्ततो रागमयी स्रवन्ती ॥ ५६ ॥

पूरं पुरो नाकनदी नगेषु
पुंस्कोकिलः पञ्चममिन्दुरूर्ध्वम् ।
ज्योत्स्नां स रागं च चतुष्टयं तद्
एवं चतुर्धामृतमुद्बवाम ॥ ५७ ॥

वीथीचरः श्रीतुलसीपदानि
गीतानि रामायणतस्तदीयात् ।
अन्यानि गीतानि च सूरदास-
मीरादिमानां स पपौ श्रवोभ्याम् ॥ ५८ ॥

रागे तथा ध्रौवपदे च मार्गे
पारङ्गतान् गायकनायकेन्द्रान् ।

स शुश्रुवानौत्तरगेयमार्ग-
मर्माणि जग्राह च सारहारी ॥ ५९ ॥

इत्थं निनाय विनिनाय चिदम्बरेन्द्र-
स्वामी स दीक्षितकुमारकमस्य सङ्गात् ।
स्पर्शादिवारुणरुचः प्रतिभा पयोजं
बालस्य पूर्णसुषमोल्लसिता ननर्त ॥ ६० ॥

श्रीत्यागराजचरणाम्बुजचञ्चरीक-
श्रीपत्तनाभिजनराघवनिर्मितेऽस्मिन् ।
श्रीदीक्षितेन्द्रचरिते गुरुलाभकाशी-
यात्राभिधाऽगमदष्टम एष सर्गः ॥ ६१ ॥

इति श्रीश्रीनगराभिजन-कौशिकश्रीराघवशर्मणा
विरचिते श्रीमुत्तुस्वामिदीक्षितचरिते
गुरुलाभकाशीयात्राभिधानं नाम अष्टमः सर्गः ॥

॥ नवमस्सर्गः ॥

अथैकदा स्नानजपेशदर्शन-
व्रतावसानेऽन्तिकमेत्य तस्थुषः ।
विलोक्य शिष्यस्य मुखे गृहोत्कता-
कलामिव प्राह महान् स सस्मितम् ॥ १ ॥

तवेह वासोऽयमलं फलोपगो
निवर्तितुं सम्प्रति साम्प्रतं तव ।
पिता स वृद्धश्चिरविप्रवासतः
त्वदाननालोकसमुत्सुको भवेत् ॥ २ ॥

अतः स्वदेशं प्रति साधयाधुना
भवन्तु मार्गा अपि शन्तमास्तव ।
प्रयाहि गायन् भगवत्पदानि ते
प्रसिद्धिसिद्धी उभयं भविष्यति ॥ ३ ॥

स्वदेशिकादेवमवाप्य माणवः
स तामनुज्ञां गुलिकामिवाद्भुताम् ।
जवादवापन्निजनीवृदन्तिके
गिरिं गुरुश्रीगुहगेहशोभितम् ॥ ४ ॥

विलोकितुं यद्यपि तातमातुर-
स्तथापि सद्यो मणलीं स नो ययौ ।
व्यलम्बतारुह्य तिरुत्तणिस्थलीं
सिषेविषुर्देवमहाचमूपतिम् ॥ ५ ॥

गतेषु सायन्तनसेवनागत-
प्रजाव्रजेष्वेव कुमारसन्निधौ ।

निबद्धपद्मासनमायतानिलं
मनोगुहायां गुहमूर्तिमाचिनोत् ॥ ६ ॥

अतीत्य सालम्बसमाधिमद्वये
समुल्लसत्यात्मनि गाढतामगात् ।
न भौतिकी केवलमान्तरी च सा
निशापि जागर्ति हि यत्र संयमी ॥ ७ ॥

ततस्समागत्य समाधिभेदिना
महात्मना केनचिदेतदानने ।
निधाय जिह्वोपरि खण्डशर्करां
तिरोदधे सोऽपि झटित्यबुध्यत ॥ ८ ॥

स्तुतां सहस्रारसरोरुहोदरात्
सुधामिवास्वाद्य भृशं प्रहृष्यतः ।
समक्षमस्य प्रविवेश कश्चन
क्षणात्पुरो गर्भगृहं पिधानवत् ॥ ९ ॥

गुहो ममैवं गुरुनाथ एव सः
प्रसेदिवान् मे विजहार लीलया ।
चकार जिह्वां मधुमत्तमामिमां
तमेव गातुं मधुमत्तमैः पदैः ॥ १० ॥

अमुष्य निध्यायत एवमाननात्
विनिस्सृता गीतसुधातरङ्गिणी ।
यथाखिला दक्षिणभारतावनी
पवित्रिता चारु विभूषितापि च ॥ ११ ॥

गुहो मम श्रीगुरुनाथ आदिमो
जयत्यसावित्युदगायदादिमम् ।
स कीर्तनं मालवगौलमादिमं
विधाय रागं मनसः प्रसादनम् ॥ १२ ॥

सदा सहस्रारसरोजमास्थितः
पिबन् मदीयामृतगानमाधुरीम् ।
सुधीमनोगोपुरदीपिकायितः
करोतु मे ज्ञानद एष मङ्गलम् ॥ १३ ॥

इति प्रगायन् प्रथमेऽत्र कीर्तने
निजां चिदानन्दरहोऽभिधां तथा ।
स्वसर्वगीताङ्कतया समादृतां
गुरोर्गुहस्याप्यभिधां न्यवेशयत् ॥ १४ ॥

अथ द्वितीयादिविभक्तिसप्तके
कृती कृतीस्स प्रबबन्ध बन्धुराः ।
गुहाष्टकस्तोत्रमिति प्रभावतो
यदेतदर्हं व्यपदेष्टुमष्टकम् ॥ १५ ॥

'गुहस्य रूपं भज मानसानघं
त्यजोरुमायामयतापमात्मनः ।
सतीदृशे जन्मनि मानवे सुखं
व्रज व्यपेतातिशयं परात्मनि' ॥ १६ ॥

इति स्वचित्तप्रतिबोधिनीं कृतिं
जगौ समस्तागमसङ्ग्रहात्मिकाम् ।

ऋताभिधानन्दविशिष्टभैरवी-
समाख्यरागाखिलरूपदर्शिनीम् ॥ १७ ॥

अनन्तरं 'श्रीगुरुणास्मि पालितो
गुहेन नादान्तविहारिणे 'त्यसौ ।
अपूर्वरागायितपाडिनामकं
स्फुटं विवृण्वन् प्रणिनाय कीर्तनम् ॥ १८ ॥

'नमो नमः श्रीगुरवे गुहाय ते
भजज्जनानुग्रहिणे नमोऽस्त्व 'ति ।
तुरीयगेये च तुरीयमुज्जमौ
स सामरागे परसामरस्यदम् ॥ १९ ॥

ततस्स रागे बलहंसनामके
प्रपञ्चयामास कृतिं च पञ्चमीम् ।
'गुरोर्गुहात् श्रीदहरप्रदायकाद्
अहं न जानेऽन्यमि 'ति प्रकीर्तयन् ॥ २० ॥

'गुहस्य दासोऽस्मि गुरोरहं न चेत्
स चिद्गुरुश्रीगुह एव वास्म्यहम् ।'
उदीरयन्नेवमुदारमद्वयं
कृतिं स षष्ठीमकृताथ पूर्विणा ॥ २१ ॥

गुरौ गुहस्वामिनि भक्तिमादधे-
रतस्तदस्तातिशयात्मचित्सुखे ।
प्रकाश्य हंसं स्वमगायदीदृशं
ससप्तमीं भानुमतीमतीं कृतिम् ॥ २२ ॥

यथाभिधं देवनुतिक्रियार्हया
स रागदेवक्रियया ततोऽकरोत् ।
कृतिं गुरो श्रीगुह तारयाशु मा-
मितीशसम्बुद्धिमयीं च बुद्धिमान् ॥ २३ ॥

इमां च साहित्यविशेषशेमुषीं
विकस्वरामात्मनि देवदेशनात् ।
मुहुर्मुहुर्भावयतोऽस्य चेतसि
प्रमोदभूम्ना न ममौतमां तनौ ॥ २४ ॥

मुदब्धिकल्लोलसमुह्यमानवत्
समागतोऽसौ मणलीं यदानमत् ।
स्वतातपादान् स तदा तदानने
नवामवालोकयदद्भुतां कलाम् ॥ २५ ॥

प्रवासतीव्रोत्सुकबन्धुसङ्गम-
प्रमोदनान्ते विदधौ कुमारकः ।
विचित्रतीर्थाटनदेशिकेश्वर-
प्रसादसाहित्यवरास्तिसङ्कथाः ॥ २६ ॥

निशम्य पित्रा पुलकाङ्कितात्मिना
पुनः पुनश्चोदित एष लज्जितः ।
कुमारवाग्गेयकरः स्वसाहितीं
तथोत्तमे शाणदृषद्यघर्षयत् ॥ २७ ॥

"अहो सुपक्का तव वत्स नैपुणी
जयार्जयाच्छं यश ईशमुद्गृण ।

पदे च रागे च लये च ते कृतिः
स्फुटं व्यनक्त्येव तव प्रवीणताम् ॥ २८ ॥

पितुः प्रशंसातुलपारितोषिकं
मणल्यधीशस्य च सारवेदिनः ।
अवाप्य सत्कारमसौ कुमारकः
ययौ दृढं प्रत्ययमात्मशक्तिषु ॥ २९ ॥

अथैकदा तन्निखिलं कुटुम्बकं
मरवीशितुः कालकरीशितुः स्थलम् ।
जगाम पुण्यं शिवरात्रिदर्शनं
चिकीर्षु च स्वर्णमुखीनिमज्जनम् ॥ ३० ॥

किरातनागोरगलूतिकावर-
प्रदानकीर्तिं च समीरणाकृतिम् ।
हुशानिरागेण तदा समुज्जगौ
स 'कालहस्तीश्वर पाहि मामि'ति ॥ ३१ ॥

प्रतिप्रयाणे पथि वेङ्कटाचले
'विचित्रवेषात्मकविग्रहं हरिम् ।
भजामि शेषाचलनायकं फल-
प्रदायकं चे'ति जगौ वरालिना ॥ ३२ ॥

अनन्तरं नातिचिरान्निवर्तितुं
स वृद्धयज्वा कमलापुरीं निजाम् ।
मणल्यधीशानुमतिं कथञ्चन
प्रतस्थ आदाय कृतस्थलाटनः ॥ ३३ ॥

स्वपूर्वकैरध्युषिते महास्थले
चकार काञ्च्यां पुरि रामदीक्षितः ।
स वासरान् कांश्चन वासमात्मनः
सपुत्रकस्सेवितत्तदालयः ॥ ३४ ॥

तदा पुरे तत्र बभूव योगिराट्
समस्तवेदान्तकृतस्ववृत्तिभिः ।
यथार्थनामोपनिषद्यमीति यः
समं हि गीतागमयुग्मतत्त्ववित् ॥ ३५ ॥

स नादलोलो वररामभक्तिमान्
निमन्त्र्य रामाध्वरिणं न्ययोजयत् ।
'प्रचारयायोजितचारुधातुना
त्वमेव रामाष्टपदीरिमा' इति ॥ ३६ ॥

समर्पितां संयमिनाथ तां कृतिं
स रामयज्वा प्रतिगृह्य भक्तितः ।
प्रदाय तस्मै प्रथमाय सूनवे
व्यजिज्ञपद् ज्ञानिवरं तमीदृशम् ॥ ३७ ॥

'जगद्गुरोः शङ्करदेशिकेशितुः
मयाज्ञया तच्छिवगीतिमालिका ।
सरागतालप्रतिसंस्क्रियं रमा-
पुरे पुरा नित्यमगाप्यतालये ॥ ३८ ॥

अयं मम ज्येष्ठसुतः प्रगल्भते
तिरुत्तणि-श्रीगुरुनाथवीक्षणात् ।

प्रबन्धनिर्माणविधौ स दर्शय-
त्विह स्वमेधां भवतामनुग्रहात्' ॥ ३९ ॥

यतेः पितुश्चोदनया द्विधागुणं
नियोगमासाद्य कुतूहलादिमम् ।
जवाज्जगावष्टपदीर्युवाध्वरी
स्वरागतालैरयमुज्ज्वलीकृताः ॥ ४० ॥

निबद्धगीतां स निशम्य साहितीं
चिरेप्सितं काममवाप्य संयमी ।
प्रहर्षतो वर्षुक उत्तमाशिषः
तमन्वगृह्णाद्विविधोपदेशनैः ॥ ४१ ॥

ततो यतीन्द्रानुमतो [1]मतः सतां
[2]गतः श्मशानैकरसालमूलगम् ।
स भैरवीरागमुदञ्च्य 'भैरवी-
प्रसङ्गिनं चिन्तय चित्त सन्ततम् ॥ ४२ ॥

अखण्डसच्चित्सुखमन्तकान्तकं
शरीरसौन्दर्यनिराकृताङ्गजम् ।
प्रपञ्चमाकन्दकमूलकन्दमि'-
त्यमुं जगौ पार्थिवलिङ्गमैश्वरम् ॥ ४३ ॥

तमेव पञ्चाक्षरमन्त्ररूपिणं
भजेऽहमेकाम्रकनाथमित्यनौत् ।

---

१ समागमत् २ महाश्म०

स पूर्वकल्याणिमनेन मातुना
निरूप्य, गृह्णन् चतुरङ्गिणीं तथा ॥ ४४ ॥

पुनश्च रागं गमकक्रियाभिधं
वसन्तमादाय च वीरपूर्वकम् ।
उदीरयन्नाभरणं च शाङ्करं
कृतीश्चतस्रः प्रणिनाय शाङ्करीः ॥ ४५ ॥

प्रविश्य देवीसदनं स्वदक्षिणे
ददर्श सद्दर्शनपद्मभास्वतः ।
शिवावतारस्य शिवेतराध्वनां
विशोधिनः शङ्करसद्गुरोर्गृहम् ॥ ४६ ॥

विजित्य नानामतमाविलं भ्रमैः
भ्रमैस्स आसेतुहिमाद्रि भारते ।
उपेत्य काञ्चीमधिरुह्य सर्वविद्-
त्सुपीठमत्रैव च सिद्धिमध्यगात् ॥ ४७ ॥

असावधिष्ठानगतां तदाकृतिं
विभाव्य साक्षाद्गुरुपुङ्गव यथा ।
जजाप हंसाद्वयसन्मनुं मनो
नियम्य यम्यग्र उरीकृतासनः ॥ ४८ ॥

प्रदक्षिणं स क्रमवित् परिक्रमन्
प्रविश्य गायत्र्यभिधानमण्डपम् ।
बिलाग्रतः श्रीयुतचक्रतः पुरः
ददर्श देवीमधिकामकोटि ताम् ॥ ४९ ॥

यदीक्षणान्मूकमुखादयत्नतो
वचांसि निर्यान्ति सुधाप्रवाहवत् ।
स तामतुष्टूषदुपासकोत्तमः
प्रसिद्धकामाक्ष्यभिधानदेवताम् ॥ ५० ॥

मनोहरीरागमुदीर्य सञ्जगौ
निरञ्जनीं कञ्जदलायतेक्षणाम् ।
शुकीं लसन्तीं शिवपञ्जरान्तरा
मनोलयश्रीकरमोदनिर्झरीम् ॥ ५१ ॥

पुनश्च ' कामाक्ष्ययि नीरजाक्षि मां
वरप्रदे तत्त्वपदेऽम्ब तारय ' ।
इति स्तुवन् कीर्तनमन्यदातनोत्
उदारहिन्दोलमुदीरयन्नयम् ॥ ५२ ॥

सरस्वतीपूर्वमनोहरीस्वरैः
समर्चयामास पुनश्च मातरम् ।
सरस्वतीं मूकवचःप्रदायिनीं
अकारमुख्याक्षरमालिकामयीम् ॥ ५३ ॥

सरोरुहाक्षीश्वर ' साक्षि ' पाहि मां
दया ' कटाक्षि " त्रिपुरेऽम्ब सुन्दरि ।
सदामुदौघे प्रकटाद्वयात्मिके
कुमारिकेऽन्तःकरणेक्षुचापिनि ' ॥ ५४ ॥

इतीश्वरीं प्रार्थ्य स भूय एव तां
सहस्रनामस्तवनामभिर्जगौ ।

भजे भजेऽहं वरकामकोटिगां
इतीद्धकल्याण्युचितस्वरैः कृतिम् ॥ ५५ ॥

अथापरेणास्तुत वस्तुनाध्वरी
स शुद्धसावेरिनिबन्धशोभिना ।
'त्वमम्ब पाद्मेकरसालनायक-
प्रिये शिवे भक्तवशंकरी 'ति ताम् ॥ ५६ ॥

उपास्य देवीमथ सोदरं दरं
तथा क्वचित्स्वान्तिककोणगोपितम् ।
विलोक्य चोराख्यममुं निजाकृतिं
दिदृक्षुरागादधिविष्णुकाञ्च्यसौ ॥ ५७ ॥

अधिष्ठितं हस्तिगिरौ पितामह-
प्रपूजितं हस्तिवरप्रदं प्रभुम् ।
निषेव्य सारङ्गमयीं कृतिं जगौ
'उपास्महे श्रीवरदेशमि 'त्यसौ ॥ ५८ ॥

'विभो प्रभो हस्तिगिरीश पाहि मा'-
मिति प्रणीयान्यदमुष्य कीर्तनम् ।
गतो महादेव्यधिवासमैडयत्
स कामकोट्येकतयैव तामपि ॥ ५९ ॥

'जयाम्ब कामाक्ष्ययि कामितार्थदे
वरप्रदे लक्ष्मि परेशकामिनि ।

सुरेड्यमाये कमलेऽमले महा-
प्रकाशकाये महनीयराज्यदे' ॥ ६० ॥

इतीन्दिराया बिलहर्यलङ्कृतं
समर्प्य गीताञ्जलिमागतो गृहम् ।
इयेष काञ्च्यां बहुदेवसन्निधौ
दिनानि वस्तुं कतिचित् पितुर्मते ॥ ६१ ॥

असंस्तुतं मेलमयं सुमद्युतिं
समुल्लिखन् वारणशैलनायकम् ।
बिलान्तरस्थं शिवकाञ्च्यधिष्ठितं
भजेति चित्तं समबोधयत्कृती ॥ ६२ ॥

कुमारकोष्ठे गुरुमानतो गुहं
त्रिविक्रमैरावतकच्छपेश्वरान् ।
पुरणकैलासविकुण्ठनाथयोः
विशिष्टशिल्पोत्तरमालयद्वयम् ॥ ६३ ॥

तनून् शिवास्थानमुखालयांस्तथा
स सर्वतीर्थप्रभृतीरपोऽपि च ।
निषेव्य सत्यव्रतनाम्नि तत्स्थले
समं विशेषं निरशेषयत्क्रमात् ॥ ६४ ॥

विहाय काञ्चीमरुणाचलालयं
गतास्ततस्ते मखिनस्सिषेविरे ।

उपर्यधो वा विधिविष्णुलङ्घितं
तदेकतेजोमयलिङ्गमद्भुतम् ॥ ६५ ॥

स्मृतेऽपि कैवल्यदपादपङ्कजं
स्मरामि शोणाचलनाथमित्यसौ ।
मखी ततोऽपीतकुचाम्बिकापतिं
मनोज्ञसारङ्गयुतं समुज्जगौ ॥ ६६ ॥

तपांसि सूच्यग्रगतानुतस्थुषी
सती स्मरारेर्वपुरर्धमाप या ।
उपासतापीतकुचाम्बिकां यथा
भवेन्न भूयो जननीस्तनन्धयः ॥ ६७ ॥

तदालये स्तम्भगतं पुरोऽङ्गणे ।
गुहं सिषेवेऽथ विशेषतो मखी ।
प्रसेदिवान् स्वस्य यथा तिरुत्तणौ
तथात्र देवोऽरुणशैलसूरये ॥ ६८ ॥

महाग्रहारोऽस्त्यरुणाद्रयदूरतः
द्विजन्मनां वङ्गवरेन्द्रजन्मनाम् ।
वदान्यविद्यानगरक्षितीश्वरैः
द्विजन्मदेयीकलितोर्वरोज्ज्वलः ॥ ६९ ॥

निरुच्यते मूलपदेन वैदुषी
तृतः समस्तोदयसम्भवो सतः ।
तथाण्डमुत्पत्तिगृहं, वदन्ति त-
त्ततो हि मूलाण्डमिति द्विजास्पदम् ॥ ७० ॥

अमीषु भूयोऽरुणगिर्युपाख्यया
श्रुतेषु भूयोनृपकीर्त्तिगातृषु ।
द्विजेष्वभूत्कोऽपि नृपात्पराङ्मुखः
निलीय सेनापतिकीर्तनोन्मुखः ॥ ७१ ॥

कदाचिदस्मिन्नरुणाचलालये
स देवरायक्षितिपे सभाङ्गणे ।
कुशाक्तसम्बन्धरुषोऽरुणाचलं
ररक्ष तं स्तम्भगुहस्स वत्सलः ॥ ७२ ॥

'तिरुप्पुहल्'-नाम कुमारकीर्तनैः
मनोज्ञनानालयबन्धुरैस्तथा ।
कुमारभक्त्या च यथा गुहो गुरुः
तथाभवच्छोणगिरिस्स यज्वनः ॥ ७३ ॥

धनुर्गते पूषणि कल्य उत्थिताः
परस्परोद्बोधकरीः कुमारिकाः ।
गृणन्ति गाथाः भगवत्पतिंवरा
इति श्रुता द्राविडवैखरीसृतिः ॥ ७४ ॥

उदारजीवात्मपरात्मभाविनीं
इमामुपाश्रित्य कवित्वपद्धतिम् ।
जगौ स माणिक्यवचाश्च यां कृतिं
तदालये तां मुमुदे स शुश्रुवान् ॥ ७५ ॥

यथावदाग्नेयगिरिप्रदक्षिण-
व्रतं समाप्याथ स मुत्तुदीक्षितः ।

ततः स्थलादावृते पथि श्रम-
व्यपोहनायाप स सत्यमङ्गलम् ॥ ७६ ॥

तमग्रहारं कथमेत्यवलोकयन्
स रत्नवेटाध्वरिराड् यमावसत् ।
अमुष्य चेश्चीनृपमन्त्रिणः कवेः
स्मरन् जहर्षाखिलशास्त्रसद्गुरोः ॥ ७७ ॥

समागमद्यज्वकुटुम्बकं तत-
श्चिदम्बरं नाम निरुत्तरं स्थलम् ।
रहस्यविद्यां दहराभिधां बुधा
यदालयेन प्रकटीकृतां विदुः ॥ ७८ ॥

जगज्जनिस्थेमलयांस्तिरस्क्रिया-
मनुग्रहं चेति निदर्शयन्निजाः ।
स पञ्च पञ्चानन आत्मनः क्रिया
रहस्यनृत्तं तनुते यदङ्गणे ॥ ७९ ॥

समुज्ज्वलद्धेमसभान्तरुल्लसद्-
भुजङ्गमत्रासितनृत्तभङ्गिनीम् ।
नटेशमूर्तिं पिबतोऽस्य चक्षुषा
व्यजृम्भतास्तावरणो रसो हृदि ॥ ८० ॥

"सभेशमानन्दलयप्रकाशनं
समाश्रयामी"ति मुखान्मखीशितुः ।
महेशकेदारमयस्तवात्मना
रसस्ततः पर्यवहत् स पूरितः ॥ ८१ ॥

जगावथ "श्रीशिवकामसुन्दरीं
चिदग्निकुण्डोदयिनीं कलेश्वरीम् ।
विचिन्तये गानसुधाप्रमोदिनीं
स शान्तकल्याण्युचितैः स्वरैरि"ति ॥ ८२ ॥

ततो मयूरस्थलमागताश्चिरात्
कावेरजानीरनिमज्जनात्पुनः ।
नवीभवन्तः पितृबाल्यवासभु-
व्यमी व्यलम्बन्त कमप्यनेहसम् ॥ ८३ ॥

'रमापुरं त्यागविभुं च वीक्षितुं
मनो मदीयं त्वरतेऽद्य वत्सकाः ।
इतोऽजपानर्तनवैखरीश्रवः
स्पृशन्निवाकर्षति देवदूतिका ॥ ८४ ॥

तनूं मुमुक्षामि तनूद्भवा इमां
पुनर्भवाभावकरे रमापुरे ।
अतः प्रतिष्ठध्व'मिति ब्रुवन् सुतान्
स रामयज्वा पुनराप मापुरम् ॥ ८५ ॥

श्रीत्यागराजचरणाम्बुजचञ्चरीक-
श्रीपत्तनाभिजनराघवनिर्मितेऽस्मिन् ।
श्रीदीक्षितेन्द्रचरिते कवितावतार-
प्रस्तावको नवम एष जगाम सर्गः ॥ ८६ ॥

॥ इति श्रीश्रीनगराभिजन-कौशिकश्रीराघवशर्मविरचिते त्यागराजाङ्के श्रीमुत्तुस्वामिदीक्षितचरिते कवितावतारप्रस्तावको नाम नवमस्सर्गः ॥

॥ दशमस्सर्गः ॥

रामस्वामिमखीन्द्रे त्यागेशेनात्मसात्कलिते ।
पुनरपि मुत्तुस्वामी क्षेत्राटनयोगमारेभे ॥ १ ॥

कश्चिदपि शून्यभावं
स्पृशतो हृदयस्य नूनमाश्वासम् ।
देवालयादिसेवा
विदधात्येवेति तस्य विश्वासः ॥ २ ॥

त्यागेशसन्निधाने
सुन्दरसम्बन्धवाक्पतिप्रभृतीन् ।
देवारसम्प्रदाय-
प्रवर्तकान् वीक्षमाणस्य ॥ ३ ॥

क्षेत्रं क्षेत्रं गत्वा
देवो दिव्येन गीतयोगेन ।
सेव्यो मयापि भक्त्ये-
त्यास मनस्तस्य बाल्यतः प्रभृति ॥ ४ ॥

'आल्वार' 'नायन्मार्' इति
येऽभूवन् गायका भक्ताः ।
तद्वरमार्गानुसृतौ
उत्कण्ठा तस्य सुदृढमेवासीत् ॥ ५ ॥

भूयोऽप्युददीप्यत सा
गुरुणा श्रीचिदम्बराख्येन ।

उत्तरभारतपुण्य-
स्थानान्येनं पुरा नयता ॥ ६ ॥

अस्मात्क्षेत्राटनतो
नान्यः पन्था विद्यतेऽयनाय ।
सामान्यजनानामपि
सुलभतया भगवदीप्सूनाम् ॥ ७ ॥

प्रासादमेयिवान् स
प्रतिपदमीशः प्रसेदिवान् भाति ।
दक्षिणदिशि हि विशेषात्
कवेरजापूरपूतचोलेषु ॥ ८ ॥

क्षेत्रं क्षेत्रमटित्वा
तत्तत्स्थलदेवतीर्थमहिमादि ।
गीतैस्सङ्गृह्य जनान्
गापयितुं नियममेष सन्दध्रे ॥ ९ ॥

मुत्तुस्वामिमखीन्द्रो
गत्वागायद्यत्र यत्रायम् ।
सर्वत्र तत्र जनता
वशीकृतास्मै नमश्चक्रे ॥ १० ॥

भक्तिविरक्तिप्रशमा-
स्तत्तदभिज्ञत्वमध्यात्मम् ।
गानं च तस्य सर्वान्
प्रवणीचक्रुर्हि साधुरसिकौघान् ॥ ११ ॥

आर्तानभिमन्त्रणतो
मनूपदेशात् सिषाधयिषून् ।
अनुगृह्णन् स प्रययौ
गायकलोकं च गेयशिक्षाभिः ॥ १२ ॥

नागपुराध्वनि यातो
बदरीवनिकां स कीवलूरनाम्नीम् ।
तत्राक्षयलिङ्गविभुं
सेवितुमागच्छदालयं तस्य ॥ १३ ॥

तत्क्षणमेव त्वरितं
बहिरपगन्ता शिवद्विजस्तत्र ।
सन्निधिकवाटबन्धा
मखिना सम्प्रार्थितो विनयात् ॥ १४ ॥

'श्रीपुरतोऽहमुपेतो
देवदिदृक्षुर्हि तत्क्षणं भवता ।
दयया विलम्बितव्यं
यावदहं दर्शनं कुर्वे ॥ १५ ॥

'भगवानिहैव भविता
भविता प्रातश्च दर्शनं भवतः' ।
इत्यभिधाय पिधाय
द्वारं देवार्चको निरगात् ॥ १६ ॥

केचन कृतसेवा ये
तत्रासन् परिचितास्तेषाम् ।

दीक्षितकृतेऽनुनीतिं
नागृह्णादर्चकः स्तब्धः ॥ १७ ॥

अर्चकमनुकम्प्याथ
क्रुधमीषच्च नैव यातोऽसौ ।
मुत्तुस्वामिमखीन्द्रः
स्थित्वा बहिरेव तालिताद् द्वारात् ॥ १८ ॥

मीलच्चक्षुर्ध्यात्वा
भगवन्तं शङ्कराभरणम् ।
आलप्य चार्वगायत्
बदरीवनमूलनायिकासहितम् ॥ १९ ॥

" अक्षयलिङ्ग विभो भो
स्वयम्भु शम्भो प्रमोऽण्डकोटीनाम् ।
अक्षररूपामेय-
प्रताप नवनीतहृदय पाहीति ॥ २० ॥

गायति भक्त्या तस्मिन्
ओजस्व्यथ दक्षशिक्षणेत्यादि ।
व्यघटत चित्रं किल स
स्वयमेवाबद्धसन्निधिकवाटः ॥ २१ ॥

अद्भुतवार्ता चेयं
सद्यः प्रससार हि सर्वतो ग्रामे ।
जनसम्बाधश्च महान्
न चिरात्तत्रालये जातः ॥ २२ ॥

अर्चक एत्य 'महान्तः
क्षन्तुं मन्तुं ममार्हन्ति'।
इति मुत्तुदीक्षितेन्दोः
पपात पातित्यहारिणि पदाब्जे ॥ २३ ॥

अवमानाद्वा मानात्
यस्य न शोको न वा हर्षः।
गम्भीरस्स मखीन्द्रो
गायन्नेवास देवलीनात्मा ॥ २४ ॥

एतत्सम्भवकीर्तिः
पुरोगता तत्र तत्र दूतीव।
तद्यात्रायां जनतां
प्रत्युद्गमनाय चोदयामास ॥ २५ ॥

शिक्कल्नामकधाम
प्राप ततो मुत्तुयज्वेन्द्रः।
शृङ्गारसुन्दरश्री-
वेलायुधमूर्तिविख्यातम् ॥ २६ ॥

तस्मिन्नवनीतपुरे
नवनीतेशानदेवमानम्य।
रागे रमामनोह-
र्यभिधे स्कन्दस्य कीर्तनं चक्रे ॥ २७ ॥

"शृङ्गारशक्त्यायुधधर-
शरवणजातस्य देवदेवस्य।

दासोऽहमनिशमस्मि
श्रीधनधान्यप्रदस्ये"ति ॥ २८ ॥

तत आप दीक्षितेन्द्रः
शिवस्थलं नागपत्तनं नाम ।
पूर्वपयोनिधितीरे
ख्यातं प्राचीननाविकद्वारम् ॥ २९ ॥

यस्मात्प्रससार पुरा
पारेवाराशि चान्तरीपेषु ।
वाणिज्यं विज्ञानं
शिल्पं वीर्यं च चोलानाम् ॥ ३० ॥

सप्तविटङ्कक्षेत्रे-
ष्वन्यतमं प्राप्य तद् यज्वा ।
निजकमलापुरनाथ-
त्यागेशप्रतिरूपमादरान् नत्वा ॥ ३१ ॥

अतिभक्तधीवरेण
प्रत्यहमब्धौ गृहीतमत्स्येषु ।
एकं शिवार्पणमिति
त्यजते विततार यः पदं परमम् ॥ ३२ ॥

कायारोहणमीशं
स्तुत्वा स रागे देवगान्धारे ।
निकषा चूतमहीरुह-
मादिपुराणेशमेनमासेव्य ॥ ३३ ॥

देवीसन्निधिमेत्य
स गायन्नीलाम्बरीरागम् ।
" नीलायताक्षि करुणा-
कटाक्षि मां कटाक्षयाम्ब ॥ ३४ ॥

आदरि मां बिम्बाधरि
चित्प्रतिबिम्बाधरि क्षिप्रम् ।
शङ्करि नादवशङ्करि
नवमाणिक्याढ्यवल्लकीवाद्ये " ॥ ३५ ॥

इत्थं द्राविडभाषा-
च्छायालगपदनिगुम्फेन ।
अध्वरिवर्यः प्रार्थय-
दम्भोजारमणसोदरीं देवीम् ॥ ३६ ॥

निकषा नारायण्याः
सोदरमस्याः सिसेविषुः सुत्वा ।
सौन्दरराजस्थानं
यातः पश्चादयातयामेन ॥ ३७ ॥

बृन्दावनीति नाम्ना
जगौ स रागेण रागमर्मज्ञः ।
" सौन्दरराजं गजबृ-
न्दावनसारङ्गवरदराजमहम् ॥ ३८ ॥

अहिराजनागपत्तन-
राजरमासुन्दरीराजम् ।

आश्रय" इति सुन्दर-
तरपदाम्बुजं सुन्दरेण गीतेन ॥ ३९ ॥

प्रत्यावृत्तः श्रीपुर-
मचिरेणैवाथ चर चरैवेति ।
स्मृतवेदचोदना इव
क्षेत्राण्यटितुं स जङ्गमो जज्ञे ॥ ४० ॥

तञ्जाराजसभा-
लंकरणायितगीतनाटचशास्त्रज्ञाः ।
नर्तननागस्वरवि-
त्कुलानि चैधन्त यत्र भूयांसि ॥ ४१ ॥

चम्पकपरिमलमेदुर-
दक्षिणदिग्द्वारकाक्षेत्रम् ।
मन्नार्कुडीति कथितं
नातिदवीयस्तदध्वरी प्रापत् ॥ ४२ ॥

तत्रालये लसन्तं
श्रीविद्याराजगोपालम् ।
अनवेक्ष्य कस्सचेताः
शक्नोत्यन्यत्पदं गन्तुम् ॥ ४३ ॥

स्मेरमुखमोहिनीं
तन्मूर्तिं निध्यायतस्तस्य ।
पुनरपि पुनर्मखीन्दोः
प्रावहदमृताभगीतकल्लोलः ॥ ४४ ॥

तस्य स्त्रीपुंसुषमं
वीक्ष्य जगन्मोहनं रूपम् ।
ध्यात्वा च तस्य मन्त्रं
श्रीविद्याराजगोपालम् ॥ ४५ ॥

अष्टत्रिंशन्मेले
मूर्तिश्रीयुक्तनामके रागे ।
कीर्तनमसावगायद्
यथा स एवार्हतीह निर्मातुम् ॥ ४६ ॥

मन्त्राभिधयैवादौ
" श्रीविद्याराजगोपालम् ।
भज " इति पल्लविपदमुद्-
गृह्णन् मन्त्री नुनाव गोविन्दम् ॥ ४७ ॥

जीवेशजगन्मोहन-
रूपं धात्रंशरूपदिव्याङ्गम् ।
वसुदेवाह्लादकरं
रुक्मिण्या सत्यभामया सहितम् ॥ ४८ ॥

कावेर्युपमित-
सार्वेयद्भुतरागं गृहीत्वाथ ।
अध्वरिवर्योऽगायद्
गीतं " श्रीराजगोपाल " ॥ ४९ ॥

शृङ्गारलील नारी-
वेषलसद्वामभागाढ्य ।

पालय हरे विशिष्टा-
द्वैताद्वैतालये"त्यादि ॥ ५० ॥

भैरव्याथ जगौ
स क्षीराब्धिक्षेत्रगं तत्र ।
वैणिकगायकवर्यं
प्रकाशयन्सम्यगात्मानम् ॥ ५१ ॥

" गोपाल बाल पालय
मामाशु हरे कृपाजलधे ।
धीरतरभक्तवत्सल
नीरजकरनीलनीरदशरीर ॥ ५२ ॥

श्रीधर दामोदर
वर मुरलीधर निरुपमानन्द ।
गोपीमनोहर श्री-
युतलीलागोपवेषधर ॥ ५३ ॥

हतदुर्योधनकंसा-
सुर कृष्णामानसंरक्षिन् ।
आणवमुखजिन्मानस-
नित्यागारे"ति विविधसम्बुद्धया ॥ ५४ ॥

अप्यन्यस्मिन् काले
विषुवत्पुण्ये स वारिधौ स्नातुम् ।
श्रीपत्तनतोऽयासीत्
कोटीतीरं समीपस्थम् ॥ ५५ ॥

तत्रादिसेतुनाम-
न्यस्त्याचार्यो हि दक्षिणाशायाः ।
मैत्रावरुणिरगस्त्यां-
पल्लीति तदीयनामनि क्षेत्रे ॥ ५६ ॥

निकषा वेदारण्यं
यस्य कृते दम्पती प्रथमौ ।
पुनरपि निरवर्तयतां
वैवाहिकमङ्गलं नैजम् ॥ ५७ ॥

नैजश्रीपुरमुच्चुक्कु-
न्दोपज्ञत्यागराजवेरेषु ।
सप्तविटङ्केष्वेकं
यत्रामृतनटनकृद् भाति ॥ ५८ ॥

वेदकवाटं बद्धं
द्राविडदेवारगीतिभिर्नैजैः ।
यत्रोद्घाटितवन्तौ
वागीशज्ञानसम्बन्धौ ॥ ५९ ॥

वीणानादविदूषण-
वाणीत्यभिधां मनोहरां दधतीम् ।
वेदारण्येश्वरमपि
दृष्ट्वा तावादिदम्पती तत्र ॥ ६० ॥

मुक्तिप्रदाय तस्मै
वेदागमविनुतवैभवायासौ ।

लघुतोडिगोतिकुसुमा-
ञ्जलिनादावर्पयन्नमोवाकम् ॥ ६१ ॥

प्रातर्मङ्गलसमुचित-
चेतःशमदायिबौलिरागेण ।
" श्रीपार्वतीपरशिवौ
चिद्बिम्बौ लीलया धृताकारौ ॥ ६२ ॥

आपादमस्तकालं-
कारावाद्यन्तविरहिताकारौ ।
लोपामुद्रेशार्चित-
चरणौ लौपादिवारणौ बन्दे " ॥ ६३ ॥

इति पण्डिततरगुरुगुह-
रूपः शिवयोः समर्प्य तत्स्तोत्रम् ।
मुत्तुस्वामिमरवीन्द्रः
पश्यन्नन्याश्च सन्निधीस्तत्र ॥ ६४ ॥

हुङ्कारगणपतिं श्री-
चतुराननदक्षिणामूर्तिम् ।
सेवित्वा निजभवनं
प्रत्यागच्छन्निजावासम् ॥ ६५ ॥

तत्र श्रीमुखमासीद्
आगतमाचार्यशङ्कराङ्घ्रिभ्यः ।
आयाहि कुम्भकोणं
दर्शनहेतोरितीरितादेशम् ॥ ६६ ॥

महात्मदेवालयदर्शनेषु
तस्य प्ररूढस्वरसप्रवृत्तेः ।
आचार्यतः श्रीमुखमाप्तमासीत्
तदिक्षुभक्षार्थकवेतनाभम् ॥ ६७ ॥

काञ्चीशङ्करपीठदीक्षितकुले दीर्घानुबन्धे इति
द्वेधा श्रीमुखमादरातिशयतो मूर्ध्ना स गृह्णन् मखी ।
नूत्नानुग्रहसम्भवो बत गुरोः सद्यात्मजातीरयोः
नूत्नक्षेत्रविलोकभाग्यमिति च प्रस्थानसज्जोऽभवत् ॥६८॥

श्रीत्यागराजचरणाम्बुजचञ्चरीक-
श्रीपत्तनाभिजनराघवनिर्मितेऽस्मिन् ।
श्रीदीक्षितेन्द्रचरिते कमलोपकण्ठ-
क्षेत्राटनेन दशमो गत एष सर्गः ॥ ६९ ॥

॥ इति श्रीश्रीनगराभिजन-कौशिकश्रीराघवशर्मणा
विरचिते श्रीमुत्तुस्वामिदीक्षितचरिते
कमलोपकण्ठक्षेत्राटनं नाम दशमस्सर्गः ॥

॥ एकादशस्सर्गः ॥

कुम्भघोणगमनोन्मुखो मखी
श्रीपुराच्छुभदिने प्रतस्थिवान् ।
कृष्णमङ्गलपदं प्रपेदिवान्
भक्तवत्सलविभुं न्यषेवत ॥ १ ॥

वंशवत्यभिधमेलरागिणा
कीर्तनेन तमगायदध्वरी ।
" साभिषेकलतिकाभिधाम्बिकं
भक्तिमज्जनहृदापरोक्षितम् ॥ २ ॥

वेदसागरविशालमण्डपं
ब्रह्मपापविनिवृत्तिकारिणम् ।
देवरूपमधुमक्षिकेडितं
पक्षिराजविभवप्रदायकम् ॥ ३ ॥

शीतभानुगुरुतल्पपापहृद्-
दर्शतीर्थतटपश्चिमावनौ ।
उत्पलावतकसंस्थितं दशा-
कारधारिणमहं भजेऽनिशम् " ॥ ४ ॥

' एण्कण् '-आभिधमथाध्वरी स्थलं
विश्रुतं गुरुगुहस्य जग्मिवान् ।
तत्प्रसादपरिवृद्धवैखरीं
तत्स्तवेन पुनरप्यपावयत् ॥ ५ ॥

आससाद मखिपुङ्गवो घट-
द्वारनामकमथ स्थलोत्तमम् ।
शम्भुविद्धकलशामृताप्लुतं
कुम्भघोणपरिवारकस्थलम् ॥ ६ ॥

घोणनामभृतमीश्वरं बृह-
न्नायिकासहितमुन्नतालये ।
सोऽभिवन्द्य समुपाययौ स्थलं
यत्र सर्वमपि सारनामभृत् ॥ ७ ॥

सारतीर्थकृतमज्जनो मखी
सारनाथमथ सारनायिकाम् ।
ज्ञानवल्ल्यभिधपार्वतीं शिवं
'शेन्नेरी'श्वरमपि प्रपेदिवान् ॥ ८ ॥

'नाच्चियार्'-अभिधया श्रुते स्थले
वीक्ष्य वृष्णिकुलवीरपञ्चकम् ।
सूरिगीतमवलोकयन् पथि
क्षेत्रजातमखिलं मखी क्रमात् ॥ ९ ॥

कुम्भघोणमभजद्विमुक्तिद-
द्वादशस्थलगणप्रकीर्तितम् ।
शङ्करैर्यदधिकाञ्च्यधिष्ठितं
कामकोटिनिजपीठमाश्रितम् ॥ १० ॥

यन्नियोगत उपागतो मखी
कुम्भघोणमथ तं गुरूत्तमम् ।

कामकोटिपरशङ्करासनं
चन्द्रशेखरयतीन्द्रमास्थितम् ॥ ११ ॥

प्राप्य दत्तसकुटुम्बवन्दनो
भिक्षया च तदनुज्ञया ततः ।
श्रीमहात्रिपुरसुन्दरीयुतं
चन्द्रमौलिमुपवीणयन् जगौ ॥ १२ ॥

चन्द्रशेखरगुरुर्न केवलं
ब्रह्मवित्स्वपि तु गीतवित्सु च ।
सम्मतो गुरुरतस्तदाशिषः
दीक्षितो भृशमपेक्षते स्म सः ॥ १३ ॥

कीदृशेन विनियोजनेन वो
भक्त एष लभतामनुग्रहम् ।
इत्यपृच्छदुपवेशितोऽन्तिके
श्रीमुखेऽस्य कुतुकी मखी गुरोः । १४ ॥

'वेङ्कटेश्वरमखिप्रकल्पितां
तां द्विसप्ततिकमेलपद्धतिम् ।
प्रस्तुवन् जनकजन्यरागस-
ल्लक्ष्यजातमुपकल्प्य सार्थय ॥" १५ ॥

इत्युदीर्य जयदेवसाहिती-
वर्त्मना निजविनिर्मितां कृतिम् ।
एकचूततलसीम्नि मञ्जरी-
मञ्जुले शिशिरिते च कम्पया ॥ १६ ॥

कामदग्वलयचिह्नशङ्कर-
प्रेमसुन्दरविहारवर्णिकाम् ।
रागकाव्यशिवगीतिमालिकां
यज्वनेऽथ यतिराट् समार्पयत् ॥ १७ ॥

भूय एवमदिशत् स दीक्षितं
"सम्यगेव परिशोध्य मत्कृतिम् ।
रागतालविनियोगरञ्जितां
त्यागराजपुरतः प्रगापय" ॥ १८ ॥

"किं मयात्र भगवत्पदैः कृते
कार्यमस्ति सरसे निबन्धने ।
गुर्वनुग्रहविशेष एष यत्
तत्प्रकाशनविधौ ममान्वयः" ॥ १९ ॥

"त्यागराजसदने यदन्वहं
पूजनाङ्गकृतया प्रवर्तते ।
गानवाद्यनटनादि तत्क्रमे
योक्ष्यते हि शिवगीतिमालिका" ॥ २० ॥

इत्थमध्वरिवरो निवेद्य तान्
देशिकान् कृतनमस्क्रियोऽग्रहीत् ।
अक्षतांश्च तदनुग्रहाकृतिं
तत्कृतेरपि च तालमातृकाम् ॥ २१ ॥

विश्वबीजमखिलं सहामृतं
न्यस्य कुम्भमधि तं प्रजापतिः ।

अत्यजत्प्रलयवारि रंघेर्जले-
ऽताडयत्तमिषुना पिनाकभृत् ॥ २२ ॥

यत्र भिन्नकलशः स तस्थिवान्
कुम्भघोण इति तत्स्थलं स्मृतम् ।
तत्प्रवाहिसुधयाप्लुतं पदं
श्रीमहामहतडागतां गतम् ॥ २३ ॥

तत्सुधात उदभूद्य ईश्वरः
कुम्भलिङ्ग इति सोऽपि पप्रथे ।
प्राप्य चक्रमपि यत्कराद्धरिः
दुष्टहा लसति शिष्टपो भुवि ॥ २४ ॥

कामकोटिगुरुसेवनात्परं
दीक्षितस्समुपचक्रमे क्रमात् ।
तत्स्थलस्थबहुतीर्थदेवता-
सेवनाविरतचङ्क्रमक्रतुम् ॥ २५ ॥

द्वादशाब्दपरिवर्त्युदुत्सवं
श्रीमहामहजलाशयाप्लुतः ।
विश्वनाथमभजत्तदन्तिके
कुम्भमीश्वरमथाससाद सः ॥ २६ ॥

" कुम्भनामकमहेश्वराय ते
सह्यजातटसुखाशिने नमः । "
इत्यगायदयमात्तरागक-
ल्याणिरम्यकृतिमध्वरीश्वरः ॥ २७ ॥

कुम्भसंज्ञमभिवन्द्य तं शिवं
तत्प्रियां तदनु मङ्गलाम्बिकाम् ।
तुङ्गसुन्दरगभीरविग्रहाम्
आजगाम मखिराडुपासितुम् ॥ २८ ॥

घण्टयातिविरलप्रचारया
मञ्जुलस्वरदुरूहचारया ।
"चिन्तयामि शिवनायिकां सदा
पूर्णचिद्गगनचारुचन्द्रिकाम् ॥ २९ ॥

नामरूपभुवनात्मिकां परां
चन्द्रवैश्रवणमन्मथेडिताम् ।"
दीक्षितः त्रिपुरसुन्दरीं स ता-
मित्यगायदरुणाङ्घ्रिपङ्कजाम् ॥ ३० ॥

तत्र मातृसदने ददर्श गो-
विन्ददीक्षितवरस्य विग्रहम् ।
मुत्तुमरुयभवदस्य सन्तता-
वित्यपि प्रबलभक्तिचोदितः ॥ ३१ ॥

सो हि राज्यभरधारणे गुरुः
शाङ्करेऽद्वयमते महागुरुः ।
दाक्षिणात्यवरगीतशास्त्रकृत्
स्वागमेऽपि गुरुरध्वदर्श्यभूत् ॥ ३२ ॥

मध्यरङ्गमिति विश्रुते स्थले
सह्यजामरुदतृप्तमानसः ।

शार्ङ्गपाणिरिति चैव चाप्यप-
यार्य इत्यपि य ईडितोऽभृतः ॥ ३३ ॥

तं स शेषशयनं ततो हरिं
तस्य दक्षिणत आलये स्थितम् ।
सोममीश्वरमुभौ च दीक्षितः
प्रत्यपद्यत नमस्क्रियास्तवैः ॥ ३४ ॥

देवधिष्ण्यमधिकाञ्च्यसंख्यकं
यावदेवमधिकुम्भघोणकम् ।
तत्स सर्वविशिखान्तसन्धिगं
दीक्षितोऽथ लघुमप्यवैक्षत(-सेवत) ॥ ३५ ॥

नागपूर्वकमगादथेश्वरं
तं च सूर्यमपि तद्गृहेऽभजत् ।
स्वामिनं तदनु रामनामकं
सस्तवाञ्जलिरुपस्थितस्ततः ॥ ३६ ॥

तत्पुरीपरिसरे चकास्ति यत्
राजराजनृपनामभृत्स्थलम् ।
तत्र वीक्ष्य बृहदीश्वरप्रति-
च्छन्दकानतिबृहद्विमानकम् ॥ ३७ ॥
शिल्पजातमपि दारुकावनी-
भैक्षचर्यललितं महेशितुः ।
एवमन्यदतिसुन्दरं मखी
भक्तिमान् सरसिकोऽविसिष्मये ॥ ३८ ॥

साम्यहीन इति वेङ्कटेश्वरः
यः करोपरि फलप्रदः कलौ ।
तस्य धाम निकरस्थमभ्वरी
प्राप्य तं विभुरसेवतान्यदा ॥ ३९ ॥

स्वमिनाथनिजदेशिकोल्लस-
त्स्वामिशैलमथ संययौ मखी ।
तद्धि षण्मुखषडद्रिमन्दिरे-
ष्वन्य इत्यतितरामसज्जत ॥ ४० ॥

आशिरोऽङ्घ्रिभसिताभिषेचनो-
दारतुङ्गरमणीयविग्रहम् ।
दण्डपाणिमवलोक्य लीनधीः
लब्धवाक् क्रमश उज्जगौ गुरुम् ॥ ४१ ॥

धातुना बिलहरीमयेन तं
बालगोपविदितं सुबालकम् ।
आजुहाव सनकेडितं चिदा-
नन्दनाथवरमात्मभास्वरम् ॥ ४२ ॥

अन्यदायमुपकुम्भधोणकं
मध्यपूर्वपदमर्जनं ययौ ।
यत्र राजति महेश्वरो महा-
लिङ्ग आदृतबृहत्कुचाम्बिकः ॥ ४३ ॥

आन्ध्रदेशगतमल्लिकार्जुनं
पाण्ड्यदेशगपुटार्जुनं तथा ।

एतदर्जुनवरस्थलान्तरे
क्षेत्रमेतदिति मध्यमार्जुनम् ॥ ४४ ॥

आदिशङ्करगुरोः द्विजः पुरा
वाद उत्कट उदित्वरे सति ।
यत्र लिङ्गत उदेयिवान् शिवः
सत्यमद्वयमिति व्यघोषयत् ॥ ४५ ॥

योजयन् परशुमप्रसिद्धस-
द्रागमार्तिपरशुं स दीक्षितः ।
सञ्जगावथ स 'चिन्तये महा-
लिङ्गमूर्तिमृजुमार्गदर्शितम् ॥ ४६ ॥

अन्तरङ्गभजदन्तिकस्थितं
चिन्मयस्फुरणमन्तकान्तकम् ।
आदितारकमघौघनाशकं
शोकहारिचरणाम्बुजद्वयम् ॥ ४७ ॥

श्रीपुरस्थमजपाख्यनर्तनं
ताण्डवप्रियचिदम्बरेश्वरम् ।
कालिकादयितभैरवाकृतिं
स्वामिशैलगुहरूपिणं शिवम् ' ॥ ४८ ॥

इत्यनेकतनुनामवैभव-
श्रीशिवाकृतिसमष्टिरूपिणम् ।
तं प्रपद्य पुनरन्यदुज्जगौ
अध्यहानकसमष्टिकीर्तनम् ॥ ४९ ॥

ब्रह्महत्तिमुखपञ्चपातक-
क्रूरकष्टशमनं महेश्वरम् ।
तं प्रणम्य मखिराडगात्ततो
विश्वपोषकबृहत्कुचाम्बिकाम् ॥ ५० ॥

सञ्जगौ च "परदेवता महा-
लिङ्गचित्सुखमहेशमोहिनी ।
पातु मां धनबृहत्कुचा कला-
मालिनी स्थिरविभूतिदायिनी ॥ ५१ ॥

चारुचन्द्रहसिनी सुवासिनी,
हंसिनीह भवपाशमोचनी ।"
इत्युदात्तपदवत्पदं च ध-
न्यासियोगहृदयप्रमार्जनम् ॥ ५२ ॥

ब्रह्महत्तिदुरितार्तचोलभू-
नाथकम्पहरणेश्वरालयम् ।
तत्र चण्डनरसिंहकोपह-
च्छारभावतरणं च शाङ्करम् ॥ ५३ ॥

प्राप दीक्षितवरोऽथ दक्षिणा-
वर्तमच्छगणनायकालयम् ।
यत्र सद्यतनयाप्रदक्षिणं
विघ्नराजमभिगत्य निर्ययौ ॥ ५४ ॥

चित्रशिल्पदृषदालयस्थितं
तं प्रसाद्य धवलं गणाधिपम् ।

कल्पकेशमथ तद्गुरं बृहन्-
नायिकासहितमाराध्य सः ॥ ५५ ॥

कामकोटिगुरुपीठभूषणं
नामकीर्तनपथप्रचारकः ।
बोधपूर्वपद-इन्द्रसंयमी
प्राप यत्र हि समाधिमन्तिमम् ॥ ५६ ॥

अन्यदा तमभजत्पुरं स गो-
विन्दनामविदितं समीपतः ।
वीरचोलसरिदाप्लुतो मठे
तत्र दीर्घजपमास्थितः स्थिरः ॥ ५७ ॥

दक्षिणे शुभमरुद्वृधातटे
श्रीमदस्ति विशलूरिति स्थलम् ।
शाहजीनृपतिना च यत्पुरा
नैकशास्त्रबुधसार्थसात्कृतम् ॥ ५८ ॥

श्रीधरान्वयजवेङ्कटेश्वरः
नाममार्गगुरुभक्तसत्तमः ।
यस्य पुक्कसकृतान्धसः कृते
तद्गृहान्धुममरापगागता ॥ ५९ ॥

कामकोटिपरमेश्वरेन्द्रज-
श्रीसदाशिवयतीन्द्रयोगिराट् ।
रामभद्र इति रामभावना-
दीक्षितो बुधवरास्तथापरे ॥ ६० ॥

चोलसंस्कृतयशःपटायिताः
यत्खनौ मणिगणा उदञ्ज्वलन् ।
अग्रहारवरमध्वरी तम-
प्याजगाम स कदाचिदुत्कधीः ॥ ६१ ॥

सुन्दरीसहितयोगपूर्वका-
नन्दमेत्य वरदं श्रिया श्रुवा ।
प्रार्थ्य तौ निकटकर्कटेश्वरं
तं स्तवैरभिववर्ष वर्षदम् ॥ ६२ ॥

अन्यदा ग्रहपतेः स सूर्यनार्-
कोयिलित्यभिधया श्रुतं स्थलम् ।
एत्य सूर्यमभितः कृतालयं
सेवते ग्रहगणं स्म दीक्षितः ॥ ६३ ॥

श्रीपुरे स निजशिष्यहेतवे
या नवग्रहकृतीरकीर्तयत् ।
सर्वसन्निधिषु तत्र ताः कृतीः
भक्तमेलनिबिडासु सङ्गतौ ॥ ६४ ॥

पल्लवेषु हि चिरन्तनं महा-
क्षेत्रमस्ति वटकाननाभिधम् ।
यत्र चित्रमकरोन्नटेश्वरः
कालिकाविजयमूर्ध्वताण्डवम् ॥ ६५ ॥

तत्स्थलाख्यमधिसह्यजातटं
चोलभूपतिनिमन्त्रणागतः ।

ग्राममान्यमधिजग्मवान् स ग-
ङ्गाध्वराध्वरिवरो व्यराजत ॥ ६६ ॥

तत्पदस्य निकषैव तद्गुरोः
भास्कराध्वरिण एव नामभृत् ।
अस्ति धाम यदुपज्ञमेधते
वैदिकी हि भगवत्युपासना ॥ ६७ ॥

ग्राममुग्ममिदमव्रजत्ततो
देव्युपास्तिकृतदीक्षदीक्षितः ।
भावनाहृतमखिद्वयोऽद्वय-
स्रोतसीव निममज्ज तत्स्मृतौ ॥ ६८ ॥

पट्टिपूर्वकमथेश्वरं च गो-
विन्ददीक्षितनिवासपावितम् ।
चोलराजकुलवासमालिकां
तत्समीप-पलयारुसंज्ञकम् ॥ ६९ ॥

प्रत्यहं निजशिवार्चनाहृतं
न्यूनमम्बुजसहस्रमेकतः ।
स्वीयमेव नयनं समुद्धरन्
पुण्डरीकदृगपूरयद्विभुम् ॥ ७० ॥

तोषिताच्च शिवतः सुदर्शनं
चक्रमाप, स शिवोऽन्तिकस्थितः ।
वीलिनाथ इति विश्रुतोऽर्चक-
ब्राह्मणैः शतकपञ्चकैर्वृतः ॥ ७१ ॥

प्राप्य वीकिमिकलाख्यतत्स्थलं
दीक्षितः स्तुतिसहस्रपत्रकैः ।
मोदबाष्पकणमौक्तिकाचितै-
रार्चयद्भवमपारवैभवम् ॥ ७२ ॥

वीक्ष्य दीक्षितवरोऽकरोत्पुनः
कुम्भघोणमुपगम्य कांश्चन ।
वासरान् स्व वसतिं सतीयुतः
तत्तदालयमहत्त्वभावुकः ॥ ७३ ॥

तत्र चोलभुवि सह्यजातटे
राजते प्रतिपदं स्थलं महत् ।
शैववैष्णवसुधीभिरीडितं
तत्र किन्नु स जहातु यातु वा ॥ ७४ ॥

यच्च किञ्चन बृहत्स्थलं स या-
त्वध्वरीशितुरहो रहो मनः ।
मन्यते स्म परमं रमापुरं
त्यागराजमधिराजदैवतम् ॥ ७५ ॥

तन्न्यवर्तत कवेरजातट-
क्षेत्रदर्शनमयं समापयन् ।
अञ्जसाध्वरिवरः सतीसखः
श्रीपुरं स्वविरहच्युतश्रियम् ॥ ७६ ॥

पुनरुपगत एवं श्रीपुरं श्रीमखीन्द्रः
निजशुभदिनचर्यां पूर्ववत्सोऽन्वतिष्ठत् ।

नियमविधिरमुष्यालातचक्राममाभात्
प्रतिदिवसमविच्छेदमाकल्परात्रि ॥ ७७ ॥

उषसि ददृश एष प्राचि पद्मालयाम्बू-
परिलसदुरुतेजा वन्द्यमानो द्विजौघैः ।
श्रुतिरतसुमतीनां दिव्यगायत्रलक्ष्मीं
तरुणिरिव स साक्षादेधयन् वेदमूर्तिः ॥ ७८ ॥

भसितलसितगात्रो भ्राजिरुद्राक्षमालो
मलयजसितचन्द्र-श्रीकलोद्भासिफालः ।
वदनगलितनादव्यक्तरागादिरङ्गी-
कृतहिमगिरिपुत्रीभक्तिरध्वर्युमूर्तिः ॥ ७९ ॥

अनुदिनमिति सन्ध्यास्वेष देवालयान्तः
पशुपतिरिव साक्षात् जङ्गमो सञ्चरिष्णुः ।
प्रतिपदमभिवन्द्यः दर्शनानुग्रहेच्छु-
प्रणतनिभृतभक्तैर्दीक्षितः प्रेक्ष्यते स्म ॥ ८० ॥

भूय एव हि स यज्वनां पतिः
रम्यपुष्कलकलोज्ज्वलाकृतिः ।
हन्त दत्तकमलालयोत्सवः
स्वस्थलाभिगत ऐक्षि तज्जनैः ॥ ८१ ॥

उद्वृतोच्चकरकुड्मलोच्चयैः
फुल्लपङ्कजविकस्वराननैः ।
हृष्टरोमतनुवीचिदन्तुरैः
स्वागतोक्तिकलवक्त्रवम्भरैः ॥ ८२ ॥

मोदपूररससम्भृतान्तरैः
शुद्धविग्रहविवेचकद्विजैः ।
प्रत्यभात् स कमलालयः पुरः
सत्यमेव कमलालयस्तदा ॥ ८३ ॥

श्रीत्यागराजचरणाम्बुजचञ्चरीक-
श्रीपत्तनाभिजनराघवनिर्मितेऽस्मिन् ।
श्रीदीक्षितेन्द्रचरिते ह्युपकुम्भघोण-
क्षेत्राटनाढ्यदशमोत्तर सर्ग एषः ॥ ८४ ॥

॥ इति श्रीश्रीनगराभिजन-कौशिकश्रीराघवशर्मणा
विरचिते श्रीमुत्तुस्वामिदीक्षितचरिते
उपकुम्भघोणक्षेत्राटनं नाम एकादशः सर्गः ॥

॥ द्वादशस्सर्गः ॥

स्थलीरनेका अटतोऽपि तस्य
मनो मखीन्द्रस्य पुनः पुनश्च ।
स्मरन् रमापत्तनमेव रेमे
स्थायी बभौ त्यागगतो हि भावः ॥ १ ॥

त्यागाधिराजोपरि रागगानैः
स्वयं बुभूषन्निव दीक्षितेन्द्रः ।
द्वितीयकस्सुन्दरमूर्तिनाथः
स्वजन्मधामाथ समाजगाम ॥ २ ॥

आरभ्य वायव्यविदिग्विराजि
स्वर्णाभिकर्षाभिधविघ्नराजम् ।
त्यागालये तत्परिवारधाम-
स्वपि प्रसन्नाखिलदेवतानाम् ॥ ३ ॥

सेवामुपस्कर्तुमनुक्रमेण
वितानिना तेन वितेनिरेऽथ ।
रमापुरीदैवतकीर्तनानि
बहूनि तत्क्षेत्ररहस्यवन्ति ॥ ४ ॥

अविघ्नसिद्धयै प्रथमं जगौ स
गौलेन "गौरं वसनं दधानम् ।
तटे वसन्तं कमलालयस्य
सुवर्णकर्षाभिधविघ्नराजम् ॥ ५ ॥

महागणेशोऽवतु मां भवाब्धि-
नावस्स मूलप्रकृतिस्वभावः ।
गुहाग्रजस्सौख्यकरोऽविनाशि-
कैवल्यदेहो रविकोटिदेहः ॥ ६ ॥

करप्रकाशिस्वविषाणनील-
कल्हारपाशाङ्कुशमोदकं तम् ।
स्तुत्वेति मातङ्गमुखं" विविक्षुः
त्यागालयं पश्चिमगोपुरेण ॥ ७ ॥

द्वारि स्थितं तत्र समीरसूनुं
प्रदक्षिणप्रक्रमणं समर्प्य ।
नुनाव "रे मानस रामचन्द्र-
भक्तं हनूमन्तमिमं भजे"ति ॥ ८ ॥

चिट्टस्वरन्यासमनोज्ञगेय-
हेज्जुज्जिरागोज्ज्वलकीर्तनेन ।
स प्रार्थयामास पुनस्तमेव
यज्वा प्रयुज्यच्छलनाटरागम् ॥ ९ ॥

"वातात्मजागच्छ परात्मपुच्छ
जयाच्छ भो मां परिपूर्ण पाहि ।
अये नवव्याकरणप्रवीण
सुकाव्यनाट्यादिमशिल्पतोष ॥ १० ॥

उदीर्णवेदोपनिषत्सुघोष-
समाधिजापादिधृताभिलाष" ।

स्तुत्वेति कर्णाटककापिरागे
कृतिं ददौ वीरहनूमतेऽन्याम् ॥ ११ ॥

तुरुष्कबाधासमयागतस्य
सभापतेर्यश्शरणं बभूव ।
अतीत्य तं मण्डपमाजगाम
धामाथ धीमान् कमलाम्बिकायाः ॥ १२ ॥

तत्रालये द्वारि हि दक्षिणेन
गणेश्वरो वल्लभया विभाति ।
तमुज्जगौ यज्ववरोऽथ नट्ट-
नारायणीरञ्जितकीर्तनेन ॥ १३ ॥

विशन्नथ श्रीकमलाम्बिकायाः
स सन्निधिं तत्र ददर्श देवीम् ।
देवं महान्तं तपसा विजेतुं
स ताम्रचूडासनयोगनिष्ठाम् ॥ १४ ॥

प्रदक्षिणं दीक्षित एष कुर्वन्
प्राकारवायव्यविदिङ्निकेताम् ।
श्रीकञ्जभूदेवमनोहरीं ता-
मगायदादिक्षमयार्णमूर्तिम् ॥ १५ ॥

"जाड्यापहे भारति मद्धियस्त्व-
द्भक्तावलीकल्पमहीरुहामे ।
वराभयग्रन्थविपञ्चिकाढ्य-
करेऽव मां कुन्दसुधांशुगौरे" ॥ १६ ॥



SRI KAMALAMBIKA AT TIRUVARUR
GLORIFIED IN NAVAVARNA KRITIS OF DIKSHITAR

गिरां सवित्रीमिति सत्रिवर्यो
प्रार्थ्याप्यतिक्रम्य च मुक्तिवापीम् ।
अतीत्य च स्तम्भसहस्रधाम
समाससादार्यभटप्रवेशम् ॥ १७ ॥

तस्येशकोणस्थितगोपुरस्य
बहिस्स्थ गत्वा प्रयतो ववन्दे ।
शिलास्थिरं श्रीमनुनीतिचोल-
चरित्रशिल्पं ज्वलदुग्रधर्मम् ॥ १८ ॥

प्राच्यं बृहद्गोपुरमेत्य पश्चात्
विवेश स त्यागविभोरगारम् ।
अन्तस्ततो दक्षिणतः पुराणं
धामाजगामाप्यचलेश्वरस्य ॥ १९ ॥

तत्रैव नत्वा नटराजमूर्तिं
घण्टाबृहत्स्तम्भसमीपगायाम् ।
स्थितः शिलायाममुकालयस्थं
व्यलोकयद्गोपुरसप्तकं सः ॥ २० ॥

आकाशलिङ्गं तत ऊर्ध्वसंस्थं
पातालालिङ्गं च बिलान्तरस्थम् ।
आराध्य चावृत्य ततो द्वितीय-
वातात्मभूवल्लभविघ्नराजौ ॥ २१ ॥

त्यागालयं स प्रविवेश मुख्यं
तत्रोत्तरस्यां दिशि राजमानम् ।

विटङ्कवल्मीकविभुं सिषेवे
तत्पार्थिवक्षेत्रविशेषभूतम् ॥ २२ ॥

ततः पुरारेः पुरतः स्थितं तं
द्वितीयनन्दीशनिकाशमेषः ।
यज्वा भजन् सुन्दरमूर्तिनाथं
तुष्टाव टङ्कोज्ज्वलरूपकेण ॥ २३ ॥

" समाश्रयेऽहं शिवभूमिदेव-
कुलाब्धिचन्द्रं करुणातिसान्द्रम् ।
कन्दर्पकान्तिं कलितोपशान्तिं
मन्दस्मितालापसुसुन्दराख्यम्" ॥ २४ ॥

नत्वा च नुत्वा च गुरुं तमेवं
द्वित्राणि सत्री प्रचलन्-पदानि ।
त्यागेशधाम्नोऽनलकोणमूले
मूर्तीकृतं मन्त्रमुपाससाद ॥ २५ ॥

तत्रोत्फणे कुण्डलिनिं प्रनृत्यन्
प्रकाशयन्-क्षेत्ररहस्यमन्त्रम् ।
विभाति विघ्नेश्वरविग्रहस्तं
श्रियं स गायन् श्रयते स्म यज्वा ॥ २६ ॥

श्रीमूलचक्रस्थविनायकेश-
प्रदायकामूल्यवरस्य मुक्तेः ।
अज्ञानशोकापह मूलकन्द
सषट्शतश्वासमहाधिकार ॥ २७ ॥

आधारशक्तीशमिति प्रपद्य
प्रत्यङ्मुखः प्रत्यगसौ परीतः ।
त्रिषष्टिनाथालिमतीत्य नम्रः
प्रदक्षिणार्थं प्रययौ यतात्मा ॥ २८ ॥
(प्रदक्षिणाय प्रथमाय यातः ॥)

उपेयिवान्नैर्ऋतकोणमग्रे
स पञ्चमातङ्गमुखं विलोक्य ।
मलं हरन्तं मलहंर्युदार-
गीतेन तेनेऽस्य नुतिं मनुज्ञः ॥ २९ ॥

"पाशाङ्कुशाभीतिवरस्वदन्तान्
अक्षावलिं मोदकमुद्ररौ च ।
कपालमप्याददता करेषु
विहारिणा श्रीकमलानगर्याम् ॥ ३० ॥

पञ्चेभवक्त्रेण च पञ्चभूत-
प्रपञ्चकर्त्रा परिपालितोऽहम्" ।
स्तुत्वेति पञ्चास्यसुतं स सुत्वा
प्रदक्षिणं शिष्टमगाद्विधातुम् ॥ ३१ ॥

श्रीचक्रपीठं समतीत्यभिक्षा-
टनं च लक्ष्मीमथ षण्मुखं च ।
नवग्रहालिं व्रणमोचनेशं
वल्मीकलिङ्गं च पुनर्निषेव्य ॥ ३२ ॥

त्यागेशपट्टाधिकृतं महेषु
वीथीचरं प्रेक्ष्य स चन्द्रमौलिम् ।
आगादथ त्यागविभुं स वेगात्
प्रदोषदीपार्चनदर्शनोत्कः ॥ ३३ ॥

सेवावसाने बहिरेत्य गर्भ-
गेहस्य पृष्ठे कमलोपकण्ठे ।
श्रीचक्रपीठस्य पुरः प्रपेदे
पदं स मन्त्री दहरावकांशम् ॥ ३४ ॥

निबद्धपद्मासनशोभिनोऽस्य
त्यागाजपानृत्तसमाधिभाजः ।
गतागतप्राणमरुल्लयेन
प्रनृत्त आत्मा बत निर्विवार ॥ ३५ ॥

वृत्तिप्रचाराभजनप्रचारे
शान्ते च गाढे च तथा निशीथे ।
योगेन जाग्रत्स चिराय तस्थौ
मग्नस्सहस्रारसुधांसमुद्रे ॥ ३६ ॥

ततस्समुद्यन् विदधत्तृतीयं
प्रदक्षिणं त्यागनिकेतनस्य ।
द्वारोपकण्ठे लिखितं स भित्तौ
महाजपाचित्रमवेक्ष्य दध्यौ ॥ ३७ ॥

शेषे शयानस्य हरेरुरःस्था
त्यागेशितुस्तत्र हि भाति मूर्तिः ।

श्रीपुरे विराजमाना श्रीत्यागराजमूर्तिः

THE DEITY TYAGARAJA AT TIRUVARUR
GLORIFIED IN MANY SONGS OF DIKSHITAR

व्याख्यान्त्यहंसध्वनिनात्मयोग-
मुच्छ्वासनिःश्वासजनर्तनेन ॥ ३८ ॥

ततो विनिर्गत्य स मुत्तुयज्वा
नीलोत्पलाम्बां प्रणिपत्य पश्चात् ।
श्रीदक्षिणामूर्तिमुपेत्य याग-
शालान्तिके स्तोत्रममुष्य चक्रे ॥ ३९ ॥

श्रीशङ्करस्याभरणं हि कश्चित्
यथा महाहिर्वलते विलम्ब्य ।
तथायताभोगमनोहरं त-
दाख्यं विवृण्वन् सरलं सरागम् ॥ ४० ॥

" श्रीदक्षिणामूर्तिविभो स्वदास-
जनार्तिहारिन् वटमूलवासिन् ।
आनन्दमूर्तेऽनिशमौनकीर्ते
संरक्ष मां संशयहारियुक्ते ॥ ४१ ॥

समाधिसक्ते सनकादिराज-
योगिस्तुतेऽखण्डरसाढ्यशक्ते ।
सुखप्रवृत्ते सततापरोक्ष-
प्रबोधमुक्तेऽनुभवैकतृप्ते " ॥ ४२ ॥

स्तुत्वेति योगेश्वरमालयात्स
विनिर्गतो दक्षिणगोपुरेण ।
दुर्गालय प्राप्य च दुर्गनौकां
श्रीरञ्जनीरञ्जितमुज्जगौ ताम् ॥ ४३ ॥

"दुं दुर्ग" इत्यादृतमन्त्रवर्ण-
गीतेन संचिंद्रसवर्गसारम् ।
"जयेऽभये त्वां शरणं करोमि
दयालये मातरये जये"ति ॥ ४४ ॥

भक्त्या च नादेन च नित्यमेवं
प्रपद्यमानस्य महो महिष्ठम् ।
प्रकाशमानाविरतप्रसिद्धेः
दिनं दिनं पुण्यदिनं बभूव ॥ ४५ ॥

पुराप्यभूत् क्षेत्रवरं पुरं तत्
तेनाधुना क्षेत्रतरीकृतं च ।
श्रीमत्पुरी सा च तदीयगानैः
श्रीमत्तरीभूय रराज भूयः ॥ ४६ ॥

मुख्यालये त्यागविभोः कदाचित्
जवेन सेवां स समाप्य यज्वा ।
गच्छन् परीवारसुरालयौघं
तद्दैवतान्यर्चयति स्म गीतैः ॥ ४७ ॥

स्वकीयगेहाभिमुखं समीपे
यदस्ति दण्डायुधपाणिधाम ।
तत्रास्तवीत् ज्ञानमयं गुरुं स्व-
मानन्दभैरव्युपशोभिगीत्या ॥ ४८ ॥

"दण्डायुधं दण्डितदैत्यराजिं
दयानिधिं रे भज मानसैनम् ।

चण्डांशुकोटीशतसन्निकाशं
जगत्त्रयेशानमखण्डरूपम् ॥ ४९ ॥

लिप्तं च पृथ्वीमयचन्दनेन
स्वलङ्कृतं व्योममयप्रसूनैः ।
धूपं नभस्वन्मयमग्निरूपं
दीपं रसं चाम्मयमाददानम् ॥ ५० ॥

सत्यं सुखं ज्ञानमतिस्वतन्त्रम् "
एवं तमाराधयदादरेण ।
स ह्यध्वरीन्द्रस्य गुरुर्गरिष्ठः
तत्प्रातिभोद्बोधविधानहेतोः ॥ ५१ ॥

श्रीत्यागराजचरणाम्बुजचञ्चरीक-
श्रीपत्तनाभिजनराघवनिर्मितेऽस्मिन् ।
श्रीदीक्षितेन्द्रचरिते कमलापुरस्थ-
देवालयंस्तुतिपरो गत एष सर्गः ॥

इति श्रीश्रीनगराभिजन-कौशिकश्रीराघव-
शर्मणा विरचिते श्रीमुत्तुस्वमिदीक्षितचरिते
कमलापुरस्थदेवालयपरो द्वादशस्सर्गः ॥

॥ त्रयोदशस्सर्गः ॥

दैवं पदं बहु सदेति निषेवमाणः
दैवं पदं शरणयन् न च किञ्चिदन्यत् ।
अध्यापयन्निजकृतीस्समुपेतशिष्यान्
शिष्टाग्रणीर्मखिवरो नयति स्म कालम् ॥ १ ॥

सौशील्यसूनृतवचःशुचिताविरक्ति-
विज्ञानगानभजनात्मकसप्तरोचिः ।
जज्वाल मुत्तुमखिनो वरजीवितं तत्
निर्धूमपावनशिखीव किमप्युदात्तम् ॥ २ ॥

अन्तर्मुखस्य न कदापि कदध्वगास्य-
वृत्तिर्व्यगाहत न जीवनवृत्तिचिन्ताम् ।
तस्येश्वरार्पितसमस्तभरस्य योग-
क्षेमं बभार हरिरेव यथाप्रतिज्ञम् ॥ ३ ॥

इत्थं पवित्रयति यज्वनि मापुरं तं
यज्ञेन जीवितमयेन विनिर्मलेन ।
प्रातस्समाप्य नियमान् बहिरेत्य गेहा-
लिन्दे विराजति कदाचन यज्वराजि ॥ ४ ॥

तद्गेहमागतवती नियमानुसारं
पूर्वाह्णदर्शनकृते कमलाभिधाना ।
त्यागेशसन्निधिनिवेदितगाननाट्य-
विद्याकृतार्थजनिरुत्तमदेवदासी ॥ ५ ॥

शिष्या च सा गुरुसतीं प्रथमं प्रणन्तुं
प्रष्टुं च वार्तमगमत् गृहचत्वरान्तः ।
पाकोचितेऽपि समये विगतोद्यमां तां
दृष्ट्वाङ्गणे जपपरामथ पर्यपृच्छत् ॥ ६ ॥

निर्बन्धतः कमलया परिपृच्छ्यमाना
नैवाह किञ्चिदपि यज्वपतिव्रता सा ।
गत्वा स्वयं तत इतोऽपि विलोकयन्ती
हेतुं ददर्श विषसाद ततोऽतिमात्रम् ॥ ७ ॥

"गार्हस्थ्यनिर्वहणमस्तु कथन्नु, वस्तु
पाकाय नास्ति किमपीह गुरोर्गृहेऽद्य ।
किन्त्वद्भुतोऽयमनयोर्बत बुद्धिपाकः
यद्दैवतैकशरणौ, शरणान्न यातौ" ॥ ८ ॥

"सम्पादयामि यदि न स्वयमेव सर्वं
धान्यादि नास्ति कमलेति" दृढं व्यवस्य ।
गेहान्तराद्बहिरुपेत्य गुरुं प्रणम्य
तूष्णीमवातरदतित्वरितं च रथ्याम् ॥ ९ ॥

यावत्पुरः पदमधात् प्रथमं च सा न
तावद्गुरोर्मृदुवचः "कमले क्व यासि" ।
इत्याचकर्ष बडवामिव रश्मिरेनां
प्रत्यानयच्च गुरुसन्निधिमेव भीरुम् ॥ १० ॥

"क प्रस्थिता त्व"मिति सा गुरुणा पुनश्च
पृष्टाह 'किन्नु विदिता स्थितिरद्य गेहे' ।

"का वा स्थितिः ? किमिव हन्त भवत्वितोऽपि
नास्त्येव किञ्चिदपि सम्प्रति पाकवस्तु" ॥ ११ ॥

'तत् किन्नु कर्तुमधुना प्रसृता त्वमेवं'
'विक्रीय मे कनकभूषणमेतत् ।
मासं कुटुम्बभरनिर्वहणं विधातुं
पर्याप्तमद्य सकलं समुपाहराणि' ॥ १२ ॥

शिष्यां स्वभक्तिमिति तां विनिवेदयन्ती-
माचार्य आह "कमलेऽलमतिश्रमेण ।
मुग्धासि सर्वविद ईशितुरेवमाज्ञा ;
तेनातिसृष्टमुचितं मम, नान्यदिष्टम् ॥ १३ ॥

एतद्गुरोर्गुरुवचः कमला निशम्य
व्यज्ञापयद्विनयतो "भगवन् धृतिर्वः ।
एतादृशी समुचितैव न चान्य एवं
काले कलौ प्रभवति प्रतिवक्तुमद्य ॥ १४ ॥

किन्त्वीश्वरोऽप्युपकरोति पुमात्मनैव
दैवं परं, तदपि नूनमलङ्करोति ।
यत्पूरुषं पुरुषकार उपाश्रयध्वम्
यूयं प्रभुं कमपि गानविदं वदान्यम्" ॥ १५ ॥

आकर्ण्य तद्गिर इमा मखिवर्य आह
"भक्त्या तवेममपराधमहं विसोढा ।
देवैककीर्तनपवित्रपवित्रतां मे
जिह्वां नरस्तुतिपथे कथ इवोपकर्षेत्" ॥ १६ ॥

उक्त्वेदमध्वरिवरो ललिताभिधान-
रागेण तां भगवतीं ललितामगायत् ।
"यैकैव भाति गिरिजेति सरस्वतीति
लक्ष्मीरिति त्रिविधकामदुघा प्रजानाम्" ॥ १७ ॥

"लक्ष्मीं हिरण्मयमयीमनिशं भजामि
हीनं च मानवजनाश्रयणं त्यजामि ।
नित्यां भजामि हरिणा धृतपद्ममालां
श्रीमातरं स्थिरतरां श्रियमावहन्तीम्" ॥ १८ ॥

श्रीसूक्तभावपदगर्भितमेवमम्बां
क्षीराब्धिजां हरिकरान्तरराजमानाम् ।
चिन्तामणिं श्रितजनस्य कलाविनोदां
प्रासादयन्मखिवरो निजभक्तिगीत्या ॥ १९ ॥

अस्याः कृतेः परिसमाप्तिरभून्न यावद्
यावद्वसन्तललितास्वरभेदसौक्ष्म्ये ।
आचार्यगानविशदे कमला च लीना
तावत्पुरः पथि जनास्तुमुलीबभूवुः ॥ २० ॥

प्राप्ता च कापि शकटी सह राजकीयैः
कोऽप्येषु दीक्षितमुपेत्य जगाद नत्वा ।
'स्वामिन्नियं शकटिकाखिलवस्तुपूर्णा
राजोपदा तव गृहाण वयं प्रयामः' ॥ २१ ॥

विस्मापनीं गिरमवेदितसंगतिं तां
राजाधिकारिवदनात्पतितां निशम्य ।

'किन्न्वेतद्' इत्ययमपृच्छदपच्छलात्मा
यज्वा तथैव मनसा जननीं भजंस्ताम् ॥ २२ ॥

हर्षातिरेकविवशा कमला त्वभीक्ष्णं
पर्यायतो गुरुमुखं विशिखां च दृष्ट्वा ।
अन्तर्दुता गुरुसतीं च कवाटपार्श्व-
मानाय्य दर्शितवती महदद्भुतं तत् ॥ २३ ॥

प्राहाथ राजपुरुषो 'नृपसभ्यमुख्यः
तञ्जापुरादिह रमापुरमेष्यतीति ।
अश्रावि पूर्वमधुना तु स नैष्यतीति
सन्देशहारक इहोपगतः प्रभाते ॥ २४ ॥

तस्याधिकारिपुरुषस्य तथानुगाना-
मातिथ्यकर्मकतिचिद्दिवसान् विधातुम् ।
स्फीतं मयोपकरणं घृततैलदुग्ध-
शाकेक्षुतण्डुलमुखं बत सम्भृतं हि ॥ २५ ॥

तेषामनागमनतोऽनुपयुज्यमान-
मेतावदेतदुपसम्भृतवस्तुजातम् ।
किं वा विधातुमुचितं त्विति वीक्षमाणे-
ष्वस्मासु, सम्मततया मतिरेवमासीत् ॥ २६ ॥

कस्मिंश्चिदत्र गुणधाम्नि पवित्रपात्रे
सर्वं तदेतदुचितं ननु सम्प्रदातुम् ।
तादृक् च कोऽत्र भवतीति विचार्यमाणे
'मुत्त्वध्वरी'त्युदभवज्जनतैकवाक्यम् ॥ २७ ॥

तन्नैरपेक्ष्यनियमोऽर्हसि संविधातु-
मस्मिन् प्रतिग्रहमतिं मखिसत्तम त्वम्" ।
उक्त्वेत्थमध्वरिवचोऽप्यनपेक्षमाणो
भृत्यैर्गृहान्तरनयत्स समस्तवस्तु ॥ २८ ॥

'आश्चर्य एव महिमा गुरुपुङ्गवाना-
माश्चर्य एष कमलाजननीप्रसादः ।
आश्चर्य एष गुरुसाधितनादयोगः'
इत्युन्ननाद कमला च तदा मुदा सा ॥ २९ ॥

तद्द्रव्यजातसमुपागमनस्य तस्य
यज्वेन्द्रगीतकमलानुकीर्तनस्य ।
व्यक्तीकृते कमलया च मिथोऽनुबन्धे
देवांशमेव मनुते स्म जनो मखीन्द्रम् ॥ ३० ॥

यातस्स राजपुरुषो, जनता च याता
तस्याद्भुतस्य च कथा हरितः प्रयाता ।
आगेव सिद्धबहुमन्त्रमुं जनोऽगाद्,
अद्यत्वसावुपससाद ततोऽपि भूयः ॥ ३१ ॥

अस्तीन्दिरानगरनैर्ऋतसीम्नि कश्चिद्
ग्रामः कुलिक्कर इति द्रमिडाभिधानः ।
यत्रालये विलसतो मुदि सान्नपूर्णा
विश्वेश्वरस्स च यथा निजकाशिकायाम् ॥ ३२ ॥

ग्रामस्य तस्य पतयः श्रितविश्वनाथ-
देवप्रसादसतताक्षयसम्पदाढ्याः ।

आसन् रमापुरचिरत्नपरम्परीयाः
"उल्लूर् मुदल्य"मिधया प्रभवः प्रसिद्धाः ॥ ३३ ॥

तत्सत्कुलोज्ज्वललललाम तदा बभूव
यो वैद्यलिङ्ग इति स प्रवणीकृतात्मा ।
श्रीदीक्षितेन्द्रमहिमश्रवणेन तस्मिन्
स्निह्यन् कुटुम्बभरमस्य बभार भक्त्या ॥ ३४ ॥

अप्यन्यदा प्रभुवरो निजगर्ततीरं
वैद्येशवर्षमहनिर्वहणाय गच्छन् ।
स्वेनैनमध्वरिणमप्यनुयान्तमच्छद्
आचार्यतां हि गमितः प्रभुणा स यज्वा ॥ ३५ ॥

पूर्वं चिदम्बरयमीन्द्रगुरूपनीतः
काश्यां विदूरभुवि यं स ददर्श देवम् ।
तं सान्नपूर्णमिह गर्ततटे पदान्ते
द्रष्टुं परं प्रवण एव बभूव यज्वा ॥ ३६ ॥

भक्तिं च शक्तिमपि तत्र विभुः कृतार्थी-
कुर्वन् शिवस्य विदधे स महं महान्तम् ।
देवं दिदृक्षुरुपयात इवाद्रिराज-
मिन्द्रो बृहस्पतिसखस्समखी स रेजे ॥ ३७ ॥

यात्रासमागतजनाश्च शिवार्चकाश्च
देवालयेऽप्यधिकृताश्च तदा समेत्य ।
व्यज्ञापयन् प्रखिवरं "भवदागमेन
पुष्णाति नूनमधिकां श्रियमुत्सवोऽयम् ॥ ३८ ॥

क्षेत्रं पुरातनमपीदमिमे भवन्तः
देवोपगाननुतिभिः द्विगुणप्रभावम् ।
अर्हन्ति कर्तुमपि नः प्रभुमेनमांशी-
र्गीतेन वर्धयितुम्, अस्तु महस्य पूर्तिः ॥ ३९ ॥

अभ्यर्थनामि'ति निशम्य मखी जनानां
दृष्ट्वोत्सुकं प्रभुमुखं च हसन् जगाद ।
'क्षेत्रेषु कीर्तनमिति व्रतमेष बिभ्रत्
नाहं प्ररोचनमपेक्ष इदं भवद्भ्यः' ॥ ४० ॥

तस्मै चतुर्दशजगत्पतये शिवाय
प्रत्यर्पयन्निव चतुर्दशरागलोकान् ।
यज्ञा गतागतनिवेशनचारुराग-
मालां जुगुम्फ सखिवैद्यविभूदयाय ॥ ४१ ॥

श्रीरागमारभिमपि प्रथमं गृहीत्वा
गीतस्य पल्लवमगायदयं मखीन्द्रः ।
"श्रीविश्वनाथमहमेष भजे श्रितानां
संसारभीतिहरि"ति श्रितशब्दबन्धम् ॥ ४२ ॥

रागानुदीर्य चतुरश्चतुरोऽयमादौ
गौरीं च नाटमपि गौलकमोहने च ।
प्रत्यागतेन षडपि क्रमशोऽनुयोज्य
रागान् विचित्रमनुपल्लवमाबबन्ध ॥ ४३ ॥

आदाय साम ललितामथ भैरवं च
सारङ्गशङ्करवराभरणे ततश्च ।

काम्भोजि-देवकृति-भूप-समाख्यरागान्
आयोजयच्चरणमस्य गतागतश्रि ॥ ४४ ॥

इत्यष्टमूर्तिचरणे रचिताष्टरागं
तस्यार्पयन् चरणमद्भुतकीर्तनस्य ।
" श्रीगर्ततीरपरिपालकवैद्यलिङ्ग-
भूपालपालकमवन्दत विश्वनाथम् " ॥ ४५ ॥

कुष्ठादिरोगहरदक्षिणकाशिकाख्य-
तद्गर्ततीरमहिमप्रतिपादकं सः ।
काम्भोजिरागसुषमाप्रतिपादकं च
गीतान्तरं व्यरचयद् मखिपुङ्गवोऽथ ॥ ४६ ॥

' विश्वेश्वरैहि परिपाहि मुदं प्रदेहि
चिन्मात्रभास्करनिशाकरवह्निनेत्र ।
कव्युक्तिपात्र भवरोगह वैद्यलिङ्ग '
विश्वेश्वरं स्तमिति स प्रतिपद्य पश्चात् ॥ ४७ ॥

' एह्यन्नपूर्ण ' इति तत्र सतीं सतीं तां
पुन्नागसंयुतवराल्यतिरक्तिरागे ।
पुन्नागमन्थरवलद्गतिसुन्दरेण
सत्कीर्तनेन मखिराडथ नाथते स्म ॥ ४८ ॥

' पूर्णे सदा श्रियमये मम देहि पाहि
पञ्चाशदर्णमयि पद्मविशालनेत्रि ।
विश्वेशहृत्कुवलयोल्लसनेन्दुकान्ते
चिन्मुद्रिलासिनि सुविद्रुमपाशिनी'ति ॥ ४९ ॥

यः शुद्धमद्भलविचक्षणताम्बियप्पः
शिष्योत्तमोऽभवदमुष्य विशुद्धशीलः ।
तस्योदभूदुदरशूलगदः कदाचित्
प्रारब्धकर्म वशिनं च वशीकरोति ॥ ५० ॥

आचार्यदर्शनमथेश्वरसन्निधौ च
सेवा व्यहन्यत बहूनि दिनानि तस्य ।
अग्न्यर्पितः कृमिरिवोत्कटवेदनाभि-
रुद्वेष्टते स्म हहहेति गदन् गदी सः ॥ ५१ ॥

शिष्यस्य तां रुजमथोद्विजमानमङ्ग-
भङ्गाक्षमो गुरुदयो गुरुरीक्षितुं च ।
ध्यानेन वीक्ष्य बलवद् ग्रहवैपरीत्यं
चिन्तामगाच्छदुचितप्रतिकारहेतोः ॥ ५२ ॥

मन्त्रैरुपासनममुष्य नवग्रहाणां
नो शक्यमित्ययमुपायमवैक्षतैवम् ।
शास्त्रार्थमेदुरनवग्रहकीर्तनानि
गानेन तस्य सुखसिद्धिकराणि चक्रे ॥ ५३ ॥

सौराष्ट्रागमवलम्ब्य स मुक्तयज्वा
सौराष्टवर्णमनुमेव निधाय चित्ते ।
शिष्योरुरोगविनिवृत्तिकृतेऽकृताय-
मार्द्यां स्तुतिं ग्रहशिखामणिसूर्यमूर्तेः ॥ ५४ ॥

"छायापते तव नमोऽस्तु सहस्रभानो
लोकप्रकाश विधिविष्णुशिवस्वरूप ।

आरोग्यमुख्यफलदार्यनुतोरुतेजः-
स्फूर्तें महाघहरणाखिलकर्मसाक्षिन् " ॥ ५५ ॥

"चन्द्रं भजे" त्ययमसावरिणाथ यज्वा
तुष्टाव " साधुजनमानससन्निकाशम् ।
श्रीवेङ्कटेशनयनं च विराण्मनोजं
लक्ष्मीसहोदरमुमेशशिरोविभूषम् " ॥ ५६ ॥

अङ्गारकं सुरठिनाथसुमङ्गलेन
रागेण " रक्तमपि मङ्गलवारराजम् ।
भौमं च भूमिदमुपाश्रितवैद्यनाथ-
क्षेत्रं समाश्रयत सोदरकारकम् " सः ॥ ५७ ॥

सौम्येन सौम्यमथ नाटकुरञ्जिना स
भेजे " बुधं बुधजनैर्विदितं द्विजेड्यम् ।
निष्किल्विषं मधुरसत्कवितापदं च
तारेन्दुसूनुमरुणं शिवभक्तमित्रम् " ॥ ५८ ॥

गायंस्ततो मखिवरोऽयमठानरागं
" विप्राय देवगुरवे गुरवे जगत्याः ।
वाग्बुद्धिनीतिनिधये सुतकोरकाय
ताराधवाय च बृहस्पतये " ननाम ॥ ५९ ॥

शुक्रं ततः परजुना भगवन्तमेष
" मामाशु शुक्र भगवन् परिपालये"ति ।
" राज्यप्रदं विहितदैत्यहितोपदेशं
सम्प्रार्थयत्सकलतत्त्वविदं कविं तम् " ॥ ६० ॥

काम्भोजिनाप्येरुकलेन जगौ स पश्चात्
"छायादिवाकरतनूजशनैश्चरं तम् ।
क्रूरं भयङ्करमहो भवमग्नजन्तोः
किन्त्विष्टदं भवकटाक्षितभक्तिभाजः ॥ ६१ ॥

कालाञ्जनद्युतियुतं तिलतैलमिश्र-
दीपौदनप्रियमुपाश्रितकाकवाहम् ।
कालानुजं वसनभूषणरत्नपुष्प-
कालं करालमपि कामितकामधेनुम् " ॥ ६२ ॥

छायाग्रहद्वययुतग्रहदैवतानि
स्तुत्वेत्थमध्वरिवरो 'मम शिष्य एष ।
नामानुरूपमनुजो मम नूनमेनं
स्वस्थं विधत्त दयये'ति भृशं ययाचे ॥ ६३ ॥

तम्ब्यप्पमप्यनुशशास गुरुर्मखीन्द्रः
'मा मा विषीद हृदयं च दृढीकुरुष्व ।
आवर्तय ग्रहगणस्य नुतीरिमास्त्वं
गायन्नुपांशु मनसा विमलेन भक्त्या ॥ ६४ ॥

श्रद्धत्स्व शूलिनि गमिष्यति शूलरोगः
देवो मृडो ननु भिषक्षु भिषक्तमो नः ।
त्वच्छुद्धमद्दललयोत्सुकता यदि स्यात्
त्यागेश एव स जवेन तव प्रसीदेत् " ॥ ६५ ॥

गाने न केवलमिमे गुरवोऽध्वरीन्द्राः
भक्त्या च शीलविभवेन च मन्त्रसिद्ध्या ।

आचार्यतामितरथापि च वोढुमर्हाः
चित्रं न तद् यदनुधावति वाचमर्थः ॥ ६६ ॥

आचार्यवाक्यमनुतिष्ठत एवमस्य
तम्व्यप्पनाम्न उदरामय आशु शान्ते ।
वृद्धिं जगाम फलवत्त्वयशो जगत्यां
श्रीमुत्तुदीक्षितनवग्रहकीर्तनानाम् ॥ ६७ ॥

पृथ्वीस्थलीति विदितापि रमापुरी सा
नूनं स्थलान्तरविशेषगुणैश्च पूर्णा ।
श्रैष्ठ्यं तदस्य स पुरस्य विचिन्त्य हृष्यन्
स्वैः कीर्तनैर्मखिवरो विवरीतुमैच्छत् ॥ ६८ ॥

आनन्दसिद्धचचलहाटकवालमूर-
श्रीलिङ्गपञ्चकमुपास्य पुरेऽत्र राजत् ।
तल्लिङ्गपञ्चकमुपास्य चकार पञ्च-
वक्त्रस्य वक्तृतिलकः कृतिपञ्चकं सः ॥ ६९ ॥

वल्मीकरूपपृथिवीमयलिङ्गमादौ
काम्भोजिरागमुपगृह्य स गायति स्म ।
"वीथीविटङ्कमुपसोमकुलाम्बिकं तं
सञ्चिन्तयेऽहमि"ति तारकसत्प्रकाशम् ॥ ७० ॥

क्षेत्राभिधान्तरविशेषदहाटकेश-
श्रीपाटलीद्रुमतलस्थबिलान्तवासिन् ।
श्रीदारुकावनमहर्षितपस्समुत्थ-
संतप्तहाटकमयोज्ज्वललिङ्गमूर्ते ॥ ७१ ॥

नन्यर्जुनादिभरताविदितस्वनाट्य-
स्फूर्ते विराजदजपागमहंसरूप ।
संरक्ष मामि "ति जगौ बिलहर्युदार-
पातालंलिङ्गकृतिमेव ततोऽध्वरीन्द्रः ॥ ७२ ॥

" छायाविहीन-उदकेन कृताज्यकार्यः
यद्गर्भगेहमवभासयति प्रदीपः ।
तं श्रीचमत्कृतिनृपेडितदिव्यलिङ्गं
दुःखादिहेतुभवसागरभीतिभङ्गम् ॥ ७३ ॥

शान्त्यादियुक्तहृदयाम्बुजलीनभृङ्ग-
मानन्दसच्चिदमृतैकघनप्रवाहम् ।
देवं सदा हृदि विभावय " इत्युपादाद्
भूपालकीर्तनमसावचलेश्वराय ॥ ७४ ॥

" आनन्द-नाम दधता परिरक्षितोऽहम्
आनन्द एव हि भवाम्यहमीश्वरेण ।
नित्यप्रबुद्धपरिशुद्धनिजानुभूति-
मात्रावशेषशिवसच्चितिमुन्मथेन ॥ ७५ ॥

कोशान् दशा अवयवान् अतिवर्तिधाम्ना
ज्ञानप्रदानगुहदेशिकहेतुने"ति ।
आनन्दयुक्तमथ रागमुदीर्य यज्वा
भैरव्युपाख्यमपरं स जगौ प्रबन्धम् ॥ ७६ ॥

नीलाम्बरीरुचिरकीर्तनमाततान
" सिद्धीश्वराय नम " इत्यथ यज्वसिद्धः ।

" निष्पापमानसविहारिहराय भुक्ति-
मुक्तिप्रदानचतुराय परावराय " ॥ ७७ ॥

श्रीत्यागराजचरणाम्बुजचञ्चरीक-
श्रीपत्तनाभिजन-राघवनिर्मितेऽस्मिन् ।
श्रीदीक्षितेन्द्रचरिते कमलापुरीय-
तत्तद्विशेषरुचिरोद्गत एष सर्गः ॥ ७८ ॥

॥ इति श्रीश्रीनगराभिजन-कौशिकश्रीराघवशर्मणा
विरचिते श्रीमुत्तुस्वामिदीक्षितचरिते
कमलापुरीयविशेषगतः त्रयोदशस्सर्गः ॥

॥ चतुर्दशस्सर्गः ॥

सिद्धौघसञ्चरणपावितदक्षिणाद्रि-
मालासु सोऽथ पलनीति जगाम धाम ।
यत्स्कन्ददेशिकविहारगिरिस्थलेषु
षट्स्वाविनङ्कुटिजरद्द्रमिडाख्यमेकम् ॥ १ ॥

स्नानाह्निकादि स समाप्य षडाननाख्य-
नद्यां तथा शरवणाख्यतडाकतीर्थे ।
शैलाङ्घ्रिषण्मुखमुपास्य ततोऽभ्यरोहत्
सोपानपङ्क्तिमुपरिप्रगतेः प्रगाता ॥ २ ॥

ज्ञानप्रदावसरभासुरदण्डपाणिं
भस्माभिषेकविशदोज्ज्वलसत्त्वमूर्तिम् ।
वीक्ष्याद्रिशृङ्गसदने पुलकीकृताङ्ग-
यष्टिस्स यष्टिवदभूदचलः समाधौ ॥ ३ ॥

बुद्धः कथञ्चिदथ स प्रणिधानसुप्तेः
दण्डायुधस्य विदधेऽसुरदण्डकर्तुः ।
भूतिस्फुरत्तदनुभूतिरसप्रपूर्ति-
निष्यन्दरूपनवकृत्यमृताभिषेकम् ॥ ४ ॥

तस्मात्स्थलात्प्रचलितो नव"कीर"तुल्यः
प्रापावलोक्य पथि नैकसुरालयालिम् ।
आचीनपाण्ड्यधरणीपतिराजधानीं
हालाहलास्यमधुराप्रथिताभिधानाम् ॥ ५ ॥

यत्राविरास जगतीजननी झषाक्षी
गेहे झषाङ्कनृपतेः कुलदीपिकेव ।
यत्रातनोच्चतुरुत्तरषष्टिलीलाः
लीलालवोदितजगत्सृष्टिसुन्दरेशः ॥ ६ ॥

यत्रर्षयश्च कवयश्च जिनाश्च सिद्धाः
व्यातेनिरे द्रविडवाङ्मयलक्ष्यसङ्घम् ।
यत्राबबन्ध गुरुसुन्दरपाण्डवनामा-
ऽप्यद्वैतभूमिमचलां निजकारिकाभिः ॥ ७ ॥

यत्रास नायकमहीपसभैकरत्न-
मप्पय्ययज्वकुलहीरकनीलकण्ठः ।
स्मेरा सभङ्गि सचमत्कृति यन्मुखाब्जे
प्राणैर्नवैरमरवाक्व्यलसद्विदग्धा ॥ ८ ॥

अभ्यन्तरे परिसरेषु च शैवशाक्त-
कौमारवैष्णवपवित्रमहालयौघे ।
नित्योत्सवोन्मदजनाकुलसर्वमार्गे-
तस्मिन् पुरे स चिरवाससमुत्सुकोऽभूत् ॥ ९ ॥

भक्त्यादि यद्यपि बभूव तथापि तस्य
चित्ते किमप्यभवदन्यदपि प्रगूढम् ।
यच्छल्यवत् हृदि चलद्व्यथयच्चिराय
श्रीदीक्षितस्य मधुरां मन आचकर्ष ॥ १० ॥

यौ पूर्वमेव बहुवत्सरतः स्वबन्धु-
भूतौ गतौ हि मधुरामभुजौ निजौ तौ

वार्ता तयोश्चिरमलुप्यत बालुचित्र-
स्वाम्याख्ययोः तदुदकण्ठत तत्प्रवृत्त्यै ॥ ११ ॥

एकस्तयोः पदमवाप चिराज्जनन्या
इत्युत्थिता जनवदन्त्यभवत् परीक्ष्या ।
भारं तमेतमवरोपयितुं हृदस्स
मीनेक्षणाचरणयोर्मधुरामवाप ॥ १२ ॥

भार्याद्वयेन सहितोऽथ स शिष्यसुब्र-
ह्मण्येन चाश्वरिवरः प्रविशन् पुरीं ताम् ।
वेगापगातटविहारिणमेकदन्तं
विघ्नापहं गुरुगुहाग्रजमाससाद ॥ १३ ॥

रागं भजन् बिलहरीं लहरीं मुदब्धेः
गीत्या " भजेऽहम् अखिलप्रदमेकदन्तम् ।
वाग्वल्लभारमण-पामरपण्डितेऽयं
कैलासनाथसुतम् ' इत्यमुमानुनाव ॥ १४ ॥

आदौ गुरोः प्रणतिरित्यनुरुध्य यज्वा
सत्सम्प्रदायमगमन्नगरोपकण्ठे ।
नक्तीरगीतमसुरान्तकदेवदेव-
सेनाविवाहशुभधाम पराद्रिनाम ॥ १५ ॥

चित्तापहारि सरसीद्वयसीम्नि शैल-
मारुह्य तत्र च गुहोल्लिखितात्ममूर्त्तीन् ।
देवीं शिवं गुहमपि प्रतिपद्य तेभ्यो
नीराजनं स निरमात् कृतिनाद-दीपैः ॥ १६ ॥

गच्छत्सु तत्र दिवसेष्वनुजस्स चिन्न-
स्वामी मृतस्तदितरश्च ततो विषण्णः ।
रामेश्वरं प्रति गतः प्रशमाय बालु-
स्वामीति वृत्तमशृणोदमृषाप्तवर्गात् ॥ १७ ॥

'एकोऽनुजोऽम्ब परिपालित एष यत्तत्
मीनाक्षि ते मयि दये'ति समाहितात्मा ।
देवीं मुहुर्मुहुरमोहमनास्सिषेवे
तद्ध्यानयोगकृततन्मयभावधन्यः ॥ १८ ॥

यज्वा स मीननयनां प्रणनूषुरादौ
सस्मार मङ्गलतया निजमेव तातम् ।
देव्याश्च तेन रचितां गुरुरागमालां
रागैश्चतुर्भिरधिकैर्दशकैश्चतुर्भिः ॥ १९ ॥

भक्तिप्रकर्षमुपदर्श्य तथा विभक्ति-
मालां च मीननयनाष्टकगीतमालाम् ।
जग्रन्थ मुत्तुमखिराट् उपयुज्य राग-
मालां प्रदर्शितदुरूहसुरागदाक्ष्याम् ॥ २० ॥

देवक्रियां विशदयन् प्रथमां विभक्तिं
तुष्टाव "रक्षतु दृढं मधुराम्बिका माम् ।
वाग्वादिनीप्रमुखमात्रुपसेव्यमाना
वेदान्तबोधनकरी समनुत्रिकोणा" ॥ २१ ॥

इत्थं प्रकृत्य स विभक्तिमथ द्वितीयां
आदाय रागमुदितं स्तवराजनाम्नीं ।

" रे मानसेह भज रे मधुराम्बिकामि "-
त्यन्यां बबन्ध जननीस्तवराजमेवम् ॥ २२ ॥

" संरक्षितोऽस्मि मधुराम्बिकये"ति रागेऽ-
ठाणाभिधे कृततृतीयविभक्तिगीतः ।
तुर्यां विभक्तिमृतनामकमोहनं च
धृत्वा नमस्कृतिकृतिं स बबन्ध देव्याः ॥ २३ ॥

" कादम्बरीरस-कदम्बवनप्रियायै
वाङ्माधुरीवितरणैकविचक्षणायै ।
श्रीसुन्दरप्रिय-सदाचरणेरिकायै
तुभ्य नमोऽस्तु मधुकैटभभञ्जनायै " ॥ २४ ॥

स्तुत्वेति पञ्चमविभक्तिमुदीर्य देव-
गान्धारिरागमपि तां प्रणुनाव देवीम् ।
" रे चित्त रे नहि परं झषलोचनायाः "
इत्यात्मनामपठनप्रियराजयोगाम् ॥ २५ ॥

षष्ठीप्रबन्धमथ बेगडरागरम्यं
" श्रीमातृकार्णवपुषो मधुराम्बिकायाः ।
दासस्तवाहमिति काव्यकलारसायाः
चक्रे स कामितदकामकलात्मिकायाः "॥ २६ ॥

श्रीवेङ्कटेशकृतसिंहरवाख्यरागे
यज्वाथ सप्तमविभक्तिकृतिं जुगुम्फ ।
" भक्तिं करोमि सततं मधुराम्बिकायाः
सच्चित्सुखैकरस - सर्वकलात्मिकायाम् " ॥ २७ ॥

एवं प्रगीय कलितान्त्यविभक्तिराज-
त्कल्याणिगेयमुपकल्प्य स दीक्षितोऽथ ।
सम्बोधनैर्विविधमर्थयते स्म देवीं
"कल्याणि कौलिनि शिवे मधुराम्बिकेऽत्र" ॥ २८ ॥

मीनाम्बिकां क्रमिकयाष्टविभक्तिमय्या
सद्रागरत्नचितकीर्तनमालयैवम् ।
द्वाविंशतिश्रुतिमयीं स्वररागमूर्तिं
देवीमभूषयदयं स मनीषिमुख्यः ॥ २९ ॥

एवं समापनमियाय विभक्तिरेव
न त्वस्य मीनदृशि भक्तिरजस्रपूरा ।
श्रीदीक्षितान्निरगलत् ललितासहस्र-
नामाङ्कमन्त्रमहितोज्ज्वलकीर्तनौघः ॥ ३० ॥

रागे मनःस्पृशि जगौ स वराल्युपाख्ये
"मीनाक्षि मामव दिशाविजयप्रतापे ।
श्यामे सवल्लकि वराळि सुवेणि राज-
मातङ्गि सुन्दरसुखावहशङ्करी"ति ॥ ३१ ॥

"मीनाक्षि मे मरकताङ्गि मुदं प्रदेहि
वीणाद्विपञ्चगमकाद्भुतवाददक्षे ।
हे पाशमोचनि दयामयि मानमातु-
मेये कदम्बवनवासिनि मानिनी"ति ॥ ३२ ॥

गीतं निबध्य गमकक्रियया स मेल-
रागेण चारुविलहर्यतनोदथान्यत् ।

" मां पाहि पाण्ड्यनृपपूजितपादपद्मे
कामारि मोहिनि विमर्शितनामरूपे ॥ ३३ ॥

ओड्याणपीठनिलये वरपद्मराग-
वर्णे जगज्जनयित्रि पामरपालिनी"ति ।
कल्याणदां पुनरसावसमानमेधाः
कल्याणिरागकृतिना भजति स्म मेधी ॥ ३४ ॥

" मीनाक्षि मां मधुरसत्कविताप्रदात्रि
पाह्यम्ब मुक्तियुतमुक्तिदसुन्दरी"ति ।
हृद्ग्रन्थिमेदपरशुं परजुं स रागं
व्यावर्णयन् " जयति सा मधुराम्बिकेति ॥ ३५ ॥

त्वां श्रीमहात्रिपुरसुन्दरि चिन्तयेऽह-
मि"त्यम्बुजाक्षसहजामगजामगासीत् ।
" मीनाक्षि गौरि सकले श्रियमम्ब देहि
मां पाहि भूम्युदकवह्न्यनिलाभ्रधारे ॥ ३६ ॥

तत्त्वं पदार्थयुगलेऽर्थितकामदात्रि
शृङ्गारकामकलिके श्रितरक्षिणी"ति ।
गौरीस्वराञ्चितपदैरुपगीय गौरीं
मीनेक्षणामथ जगौ शशिसुन्दरेशम् ॥ ३७ ॥

तं शङ्करं धृततदाभरणाख्यरागः
" ते सुन्दराय नम " इत्युपतिष्ठते स्म ।
तस्मै प्रणम्य मधुरानिलयाय मोक्ष-
साक्षात्कृतिप्रदमहामनुरूपिणेऽथ ॥ ३८ ॥

भूयस्तमेव वरशुद्धवसन्तगीत्या
"श्रीसोमसुन्दरमहं भज"इत्यगायत् ।
"आषाढनौ-मह-मुखोत्सवशोभमानं"
दर्बार्-पदेन पुनरेनमसौ नुनाव ॥ ३९ ॥

"नन्द्यात्ममारुतिनुतं नवनीतकाली-
पूज्यं स्मरामि मुनिभक्तवरप्रदं तम् ।
आधारचक्रनवकेशमतिप्रभावं
हालास्यनाथमिति मीनविलोचनेशम्" ॥ ४० ॥

"मां पार्वतीश परिपालय पाण्ड्यराज-
सम्पूज्य गानरसपानसदामुदाढ्य ।
भीतिप्रणाशनपटो कलिकल्मषघ्ने"-
त्यादाय कन्नडमरीरचदन्यगीतम् ॥ ४१ ॥

अप्यन्यदा सुभगमातुलभागिनेय-
लीलापवित्रितमहीधरमन्तिकस्थम् ।
गत्वाप्लुतोऽयमधिनूपुरगङ्गमम्बु-
पातेऽभ्यगच्छदथ सुन्दरराजधाम ॥ ४२ ॥

रामक्रियाढ्यकृतिनाऽथ नुनाव "सोम-
च्छन्दे विमान उपशोभिनमिन्दिरेशम् ।
मण्डूकसङ्गममहं हृतपामरत्वं
श्यामं भजेऽहमि"ति सुन्दरराजदेवम् ॥ ४३ ॥

अन्यत्र यत् परिसरे मधुरानगर्याः
आभाति पुष्पवनधाम्नि महेशधिष्ण्यम् ।

तत्रान्यदैत्य स समष्टिकृतिं प्रणीय
सौवीररागमतनोत्प्रकटं दुरूहम् ॥ ४४ ॥

शिष्टो बालुस्वामिनामानुजातो
भ्रातुश्चिन्नस्वामिनो मृत्युतो यः ।
सेतुं यातो हन्त रामेश्वरं चा-
प्युत्कण्ठा तं द्रष्टुमस्योत्कटाऽभूत् ॥ ४५ ॥

मध्येमार्गं कुण्डकुट्यां गुरुं स्वं
सुब्रह्मण्यं कालियारीश्वरं च ।
नत्वा नुत्वा सुत्ववर्योऽन्यदेवान्
प्रापत्सेतुं सर्वदुःखान्तहेतुम् ॥ ४६ ॥

श्रीत्यागराजचरणाम्बुजचञ्चरीक-
श्रीपत्तनाभिजनराघवनिर्मितेऽस्मिन् ।
श्रीदीक्षितेन्द्रचरिते मधुरागमादिः
श्रीरामसेतुगमनान्त इयाय सर्गः ॥ ४७ ॥

इति श्रीश्रीनगराभिजन-कौशिकश्रीराघव-
शर्मणा विरचिते श्रीमुत्तुस्वमिदीक्षितचरिते
रामसेतुगमनान्तः चतुर्दशस्सर्गः ॥

॥ पञ्चदशस्सर्गः ॥

अथ तस्य मखीशितुः दृशोः
पुरतः पार्श्वयुगेप्यतायत ।
सलिलैकविभूतिरद्वया
विदुषो ब्रह्ममयानुभूतिवद् ॥ १ ॥

जलधित्रयसङ्गमे परे
प्रथमं तद् विभुसृष्टिवैभवम् ।
व्यसृजद् हृदखण्डताम्बुधौ
निखिलग्रन्थिभिदाघभेदकम् ॥ २ ॥

स्तिमितो लघुवीचिनिस्वनै
रघुनाथाशुगदत्तसंस्कृतिः ।
जलधिस्तमुपागमद्भुव-
न्निव कोऽर्थस्तव साध्यतामिति ॥ ३ ॥

अथ सेतुमहास्थले यथा-
विधि कृत्वाखिलमाप्लवादिकम् ।
रघुवीरपदाम्बुजार्पणात्
धनुषस्तस्य च कोटियोगतः ॥ ४ ॥

सिकताः परिपाविताः परि-
क्रममाणः स पदा भयादिव ।
शनकैर्लघुमालयं गतोऽ-
कृत कोदण्डरघूद्वहेक्षणम् ॥ ५ ॥

स्थलवर्त्मगच्छदच्छधी-
रथ कूले जलधेः कुशेशयम् ।
अधिदर्भमशेत राघवः
प्रयतो यत्र तितीर्षुरम्बुधिम् ॥ ६ ॥

" अहमाश्रितकल्पभूरुहं
रविवंशाब्धिकलानिधिं भजे ।
दशवक्त्रविभञ्जनं दया-
रसवार्धिं व्रतदर्भशायिनम् " ॥ ७ ॥

इति सूनृतभाषिणं मखी
शुभनारायणगौलरागिणा ।
सुधियां स मणिः सुधीमणिं
रमणीयेन पदेन सङ्गगौ ॥ ८ ॥

विधिनाथ विधाय मज्जनं
नवपाषाणपवित्रवारिषु ।
तत आगमदध्वरी त्वरी
वररामेश्वरधाम तत् श्रुतम् ॥ ९ ॥

शिवलिङ्गमुपास्त राक्षस-
क्षतये यत्र स वीरराघवः ।
निजदुर्लभवार्तसोदरा-
ध्युषितं चेति यदीरितं जनैः ॥ १० ॥

अनुजं निजमन्तरा बहून्
प्रविशन्नेव पुरं स पृच्छति ।

न शृणोति च किञ्चन क्वचित्
स मखी खिन्नमना मनस्व्यपि ॥ ११ ॥

अथ सान्त्वयितुं मनो विधी-
रिततत्क्षेत्रविधेयकर्मकृत् ।
अधिवारिधि वह्नितीर्थतः
समनुक्रम्य स तीर्थसञ्चये ॥ १२ ॥

निरवर्तयदालयान्तर-
स्थितकोटिप्रभृतौ निमज्जनम् ।
तत एत्य स रामनाथस-
न्निधिमाराध्य तमीहितप्रदम् ॥ १३ ॥

नवकीर्तनमस्य तुष्टयेऽ-
कृत रामक्रिययोपशोभितम् ।
" भज एष रघूत्तमेडितं
कपिवृन्दादिनुतं फलप्रदम् ॥ १४ ॥

विहृतिश्रितगन्धमादनं
सततं पर्वतवर्धनीयुतम् ।
हृतहत्तिमुखाघसञ्चयं
परतत्त्वार्थकसोऽहमाकृतिम्" ॥ १५ ॥

इति तं प्रतिपद्य सोदर-
प्रियरामार्चितलिङ्गमैश्वरम् ।
अजिहासितदेवसन्निधिः
विललम्बे क्षणमुत्सुकोऽध्वरीः ॥ १६ ॥

चिरतन्मुखदृक् तमागमत्
प्रवयाः कश्चिदुपक्रियोन्मुखः ।
स तमाह " महन्! महत् श्रुतं
तव गीतं, तत एति मे स्मृतिम् ॥ १७ ॥

इह कञ्चन कालमावसन्
सदृशः कोऽपि तवाङ्गगीतयोः ।
मधुरात इतः समागतः
प्रथमं चोलभवस्स दीक्षितः " ॥ १८ ॥

इति केवलमीरितो जनैः
कतिभिश्चिन्निभृतो गतागतौ ।
विरलौ वीचिविरक्तभावनः
जपगानाभिषवैकतत्परः ॥ १९ ॥

" सदयो हि भवान् भवेरितो
मम नूनं परमोपकारकृत् ।
भवता स निवेदितोऽनुजो
मम नूनं, यदुदन्तलालसः ॥ २० ॥

अहमत्र तदीप्सया भ्रमा-
म्यथ स क्वाद्य गतः स्थलादितः " ।
इति दीप्तिजुषाननेन तं
परिपप्रच्छ स मुत्तुदीक्षितः ॥ २१ ॥

स च मुत्तुमखीन्द्रमब्रवीत्
" श्रुतमेङ्ङ्यपुरं भवेत्त्वया ।

इह तीर्थनिवेवणाय त-
त्पुरराजो रसिकः समागमत् ॥ २२ ॥

स महीपतिरैक्षतात्र तं
यमवोचत्तव सोदरं भवान् ।
नवफक्किकया शिवाग्रतो
वरगीत्या लयमीयुषं हृदि ॥ २३ ॥

स निशाम्य निशम्य गायकं
रुचिरं गीतमपि क्षमापतिः ।
उदकण्ठत भूय एव त-
च्छ्रवणाय स्वगृहं तमानयत् ॥ २४ ॥

स मखी नवकीर्तनं जगा-
वथ पाश्चात्यधनुः प्रवादिते ।
नववाद्ये वयलिन्निति श्रुते
स्वमपूर्वां पटुतामदर्शयत् ॥ २५ ॥

स चमत्कृत एडभूपतिः
प्रतिगन्ता निजमेडयापुरम् ।
अनयन् मखिनं सहात्मनाः
भविता तत्र सुखी तवानुजः" ॥ २६ ॥

इति तेन दयालुनेरितं
मनसो भारहरं वचोऽमृतम् ।
अणतः प्रतिगृह्य मुत्तुम-
ख्यवदद्धर्षजलाप्लुतेक्षणः ॥ २७ ॥

सफलं मम सेतुदर्शनं
करुणाहो मयि रामनाथतः ।
अहमेष गतोऽधुनैव त-
त्पुरमेङ्कप्पमहीपतेरिति ॥ २८ ॥

सुहृदं स कृतज्ञतागिरा
भगवन्तं नतिभिः परिक्रमैः ।
अभिराध्य मखी यदा मुदा
प्लवमानेन ययौ ततः स्थलात् ॥ २९ ॥

सकुटुम्बकमेङ्कयापुरं
प्रति तल्लक्ष्यमनाः स तत्त्वरे ।
मधुरामतिगत्य सोऽभजत्
पथि शात्तूरिति वैष्णवस्थलम् ॥ ३० ॥

अभिवन्द्य तदालयस्थितं
वरदाभीतिदवेङ्कटेश्वरम् ।
अथ विश्रमणाय शिश्रिये
लघु सत्रावसथं स सत्तिराट् ॥ ३१ ॥

जपपूजनवैश्वदेवकृद्
बहिरागच्छदलिन्दमध्वरी ।
अशृणोन्मिलतां द्विजन्मना-
मथ संलापगिरः प्रहर्षिणीः ॥ ३२ ॥

" स्वयमेङ्कयराट् स्वगायक-
प्रवरस्याद्य विवाहमङ्गलम् ।

महता विधिना विधास्यति
त्वरमाणास्तदवेक्षितुं वयम् " ॥ ३३ ॥

इति विप्रवचांसि शुश्रुवान्
बलवत्कौतुकफुल्लमानसः ।
उपसर्प्य स मुत्तुदीक्षितः
परिपप्रच्छ भृशं महीसुरान् ॥ ३४ ॥

' अपि वित्थ स गायकोत्तमः
किमुपाख्यः कुत आगतोऽत्र वा ' ।
इति वेदितुकाममाह स-
द्विजसार्थस्तम् ' असौ महीभृता ।
इह आहृत आदरात् स्थलो-
त्तमरामेश्वरसेविनाचिरात् ' ॥ ३५ ॥

प्रवदन्त्यपि बालुदीक्षितं
तमिति प्रोक्तवति द्विजव्रजे ।
वपुषि प्रमुदो मखीशितु-
र्न ममुः, गद्गदवाग्जगाद सः ॥ ३६ ॥

" अनुजो मम बालुदीक्षितः
सुचिराद् दृष्टिपथात्कचिद्गतः ।
जनतावचनात् तमीक्षितुं
बत रामेश्वरमागतोऽस्म्यहम् ॥ ३७ ॥

अथ तत्र यदृच्छया श्रुतं
यदमुं मेऽनुजमेडभूपतिः ।

तदुदारकलावशीकृतः
निजमेङ्ख्यपुरं सहानयत् ॥ ३८ ॥

इति तच्छ्रवणादिहागतोऽ-
स्म्यधुनाश्रावि भवद्वचोऽमृतम् ।
जन एष भवत्पथानुगः
सकुटुम्बो नयत द्विजा अमुम् ॥ ३९ ॥

अविलम्बमथ प्रतस्थिरे
मखिराजस्स महीसुराश्च ते ।
अगणय्य खरं रविं जवा-
दगमन् ग्रामततीर्विलङ्घ्यते ॥ ४० ॥

पथि शुष्कतटाकसारणीः
स्फुटितं क्षेत्रतलं च सर्वतः ।
विरलच्छदगुल्मपादपान्
ददृशुश्चातपसंकुचद्दृशः ॥ ४१ ॥

अधिमस्तकमुष्णगोः कराः
अधिदेहं प्रबलोष्णवायवः ।
अधिपादमुदूष्म भूरजः
बत तापत्रयमास दुस्सहम् ॥ ४२ ॥

अतिदूरहृतालपतोयभृद्
घटवाहा वनिता इतस्ततः ।
अनवाप्य जलं तृणं दलं
तरुमूलान्यपि सन्नगोवृषान् ॥ ४३ ॥

इति वृष्टिविलोपसम्भवां
दुरवस्थां प्रसृतां स दीक्षितः ।
अवलोक्य विदूनमानसः
कचन ग्रामजनान् स्म पृच्छति ॥ ४४ ॥

श्रमहानिकृते सह द्विजैः
अपि सन्ध्याविधये च तस्थुषि ।
मखिनि स्वमवृष्टिकष्टजं
व्यसनं सर्वमवर्णयन् जनाः ॥ ४५ ॥

कृतसान्ध्यविधिस्समुज्ज्वल-
न्निटिलः कुङ्कुममस्मपुण्ड्रकैः ।
अभिजप्य महेश्वरीमनुं
करुणौघाप्लुतमानसो मखी ॥ ४६ ॥

स जगावमृतप्रवर्षिणी-
नवरागेण ' शिवेऽमृतेश्वरी ।
सदये हरपूजिते भवा-
न्यमृतानन्दरसाभिकर्षिणि ॥ ४७ ॥

सपदीह सुवृष्टिहेतवेऽ-
मृतपर्णिन्यपि चित्स्वरूपिणि ।
सततं भवतीं विचिन्तये
सलिलं वर्षय वर्षयाधुना " ॥ ४८ ॥

इति गायति दीक्षिते ददुः
सुमृदङ्गध्वनिमम्बुदा दिवि ।

सुभगोऽथ ववौ सुशीतलो
मरुदालापनिभो रसार्द्रितः ॥ ४९ ॥

भगवत्युदमीलयत्तटि-
न्निषतो नैजकृपाकुलेक्षम् ।
प्रसभं ववृधे त्रिकालिनी
स्वरधाटीव च वर्षघोरणी ॥ ५० ॥

सुचिरान्तरतापमुर्वरा
मुदि निःश्वासमिवासृजद्बहिः ।
द्विजकर्षकवैश्यकर्मकृ-
न्मयलोकः सकलो ननर्त च ॥ ५१ ॥

दिवि मेघकुलं यथा तथा
भुवि देवप्रतिमं मखीश्वरम् ।
अभितो जनता कृतज्ञता-
भृतभक्त्या तुमुलीबभूव ह ॥ ५२ ॥

कतिचित्प्रशशंसुरेकतः
ननु सिद्धेन महात्मनामुना ।
सलिलाहरणेन पालिता
चरणन्यासपवित्रितात्र भूः ॥ ५३ ॥

मखिनः पतिताः पदाब्जयो-
रुपमर्देन मधूपवत्परे ।
सजलाम्बरकम्पिताङ्ककं
निभृतं विस्मयतः स्थिताः परे ॥ ५४ ॥

नभसो न्यपतन् स्फुटद्घटा-
दिव सर्वां रजनीमपोऽखिलाः ।
न च दीक्षितसन्निधिं क्षणं
परिमोक्तुं जनता शशाक सा ॥ ५५ ॥

घनतो घनता क्रमादगात्
क्रमशोऽभूत्क्रशिमा च वृष्टिषु ।
विशदारुणमैन्द्रदिङ्मुखं
व्यहसद्वीक्ष्य सुभिक्षसम्भवम् ॥ ५६ ॥

प्रणिपत्य रविं यथा गुरुं
मखिनं तं जनता व्यलीयत ।
पुनरेव कृताह्निकाः द्विजा
मखिराडेङ्गपुरं प्रतस्थिरे ॥ ५७ ॥

पथि पिच्छिलपङ्किले क्वचि-
त्प्रवहद्वारिनिमग्नदारिते ।
अभितः सलिलेभ्य उत्थिते
बलवद्भेककुलारवक्रमे ॥ ५८ ॥

अतिमन्थरमेव गच्छतः
द्विजसार्थस्य न कश्चन श्रमः ।
अपि तु प्रियमेव तद्भवौ
जनहर्षं स्मरतः प्रवर्षजम् ॥ ५९ ॥

न मही न सरो न चोन्नतं
न च निम्नं विषमं समीकृतम् ।
सुविभूतिमता तदम्भसा
हृदि दध्यौ कृतमद्वयं मखी ॥ ६० ॥

"अयमेव महत्तरोऽनुजाद्
भगवत्याश्च वरप्रसादभाक् ।
अमुमेड्डयभूपतिर्गुरुं
ध्रुवमाराधयिता स देववत्" ॥ ६१ ॥

इति केनचन द्विजन्मना
कथितेऽन्यो विवशो जगाद तम् ।
"अहमग्रगतो महीपतिं
त्वरयिष्ये निखिलं निवेदयन् ॥ ६२ ॥

शुभपूर्णघटः सबाडवो
विधिवत्स्वागतमेलतालभृत् ।
मखिनं स पुरस्करिष्यति
ध्रुवमागत्य पुरः पुराद्बहिः" ॥ ६३ ॥

स वदन्निति वाडवः शनैः
गलितोऽलक्षित एव सार्थतः ।
मलयानिलवद् मधोः पुर-
स्सरदूतोऽभवदध्वरीशितुः ॥ ६४ ॥

श्रीत्यागराजचरणाम्बुजचञ्चरीक-
श्रीपत्तनाभिजनराघवनिर्मितेऽस्मिन् ।
श्री दीक्षितेन्द्रचरितेऽगमदेष सर्ग-
एड्डप्पराट्समुपसर्पणपूर्वरङ्गः ॥ ६५ ॥

इति श्रीश्रीनगराभिजन-कौशिकश्रीराघव-
शर्मणा विरचिते श्रीमुत्तुस्वमिदीक्षितचरिते
एड्डप्पराडुपसर्पणपूर्वरङ्गो नाम पञ्चदशस्सर्गः ॥

॥ षोडशस्सर्गः ॥

सपूर्णकुम्भमाङ्गल्यैर्ब्राह्मणैर्वेदपारगैः ।
बालुस्वामिपुरोगैश्च गीतवाद्यविशारदैः ॥ १ ॥

पुरप्रवेशसीमान्ते कदलीपूगतोरणैः ।
मण्डितं मण्डपं प्राप्य श्रीमुत्तुस्वामिदीक्षितम् ॥ २ ॥

प्रत्युद्गन्तुं महात्मानं सज्जोऽभूदेङ्डभूपतिः ।
सायं प्रत्यगभिव्याप्तशान्तकाषायरोचिषि ॥ ३ ॥

त्रयीमये महातेजस्याप तद्धाम दीक्षितः ।
पुरसीमतडागे स भस्मोद्धूलितविग्रहः ॥ ४ ॥

सावित्रं मह आराध्य स्वयं शम्भुरिव ज्वलन् ।
ऊढः शिरोभिरिव तैः भक्त्या शात्तूर-द्विजन्मभिः ॥ ५ ॥

प्रविवेश पुरद्वारे राजाधिष्ठितमण्डपम् ।
ब्रह्मघोषो महानासीद् वाद्यघोषश्च तादृशः ॥ ६ ॥

फलमाल्याद्युपाहृत्य साष्टाङ्गं प्रणिपत्य च ।
वेङ्कटेश्वर एङ्डप्पो राजा विघटिताञ्जलिः ॥ ७ ॥

स्वागतव्याहृतिव्याजात् यज्वने स्वं न्यवेदयत् ।
राज्ञे स्वं प्रीतिमावेद्य विनयादींश्च तद्गुणान् ॥ ८ ॥

पचेलिमान् प्रशस्याथ, भ्रातरं प्रैक्षताध्वरी ।
आनन्दबाष्पस्नपितः घनरोमाञ्चकञ्चुकः ॥ ९ ॥

स्विन्नो विसंस्थुलः स्तब्धो गद्गदैस्तरलस्वरः ।
सर्वसात्त्विकभावानामावेशेन व्यलीयत ॥ १० ॥

बालुस्वाम्यनुजो वीक्ष्य मुत्तुस्वामिनमग्रजम् ।
समागतौ तौ पश्यन्ति भ्रातरौ दीक्षितोत्तमौ ॥ ११ ॥

परस्परस्य सदृशौ प्रमाणेङ्गितचेष्टितैः ।
विनयाचारसौशील्यविद्याकौशलगौरवैः ॥ १२ ॥

मेने गोष्ठी स्थिता तत्र प्राप्तौ श्रीरामलक्ष्मणौ ।
सर्वैर्व्यतिकरैरेभिरुदात्तीकृतमानसः ॥ १३ ॥

मुत्तुस्वामिमखीशानं वेङ्कटेश्वरभूपतिः ।
कालातिपातशङ्की स प्रश्रयेण व्यजिज्ञपत् ॥ १४ ॥

दैवानुग्रह एवैष भवादृशमहात्मनाम् ।
सङ्गो मे प्रजानां च प्रेयसे श्रेयसे ध्रुवम् ॥ १५ ॥

विशेषतो भवत्प्राप्तिसमयोऽयं मयस्करः ।
श्वः प्रातर्भवतां पुत्रतुल्यस्यास्यानुजन्मनः ॥ १६ ॥

घटितं मे प्रयत्नेन भवितोद्वाहमङ्गलम् ।
सहोदरान्तरमृतेर्विरक्तो हि बभूव सः ॥ १७ ॥

रामेश्वरस्थलादत्र सदा स्थातुं मदन्तिके ।
आस्थातुं चैव गार्हस्थ्यमानायि नयतो मया ॥ १८ ॥

उचिता विचिताप्यस्य स्नुषापरिणयाय च ।
भवदागमपुण्यस्य सर्वमेतत्पुरः फलम् ॥ १९ ॥

आशीर्वादेन भवतां भवतामेव सन्निधौ ।
सम्यक् संपद्यतांशोऽयं भ्रातुर्वैवाहिको विधिः ॥ २० ॥

इतीरिते नृपतिना चचाल मिलितो जनः ।
अग्रतः प्रययुर्बाणविद्याकुशलकारवः ॥ २१ ॥

ततो भटाः चित्रवर्णपटतोरणधारिणः ।
ततो नागस्वरातोऽध्वसम्प्रदायधुरन्धराः ॥ २२ ॥

अग्रगण्याश्च गणिका भरते निरतास्ततः ।
संस्कृतद्रमिड़ान्ध्रीयवाक्षु वाग्गेयकारिणः ॥ २३ ॥

वैदिकाः शास्त्रिणो ज्योतिर्मन्त्रतन्त्रादिपण्डिताः ।
कवयश्चाटुकवयः कवयो विकटास्ततः ॥ २४ ॥

मध्ये तदनु भूमीशो यज्वभ्रातृयुगान्वितः ।
पुनर्वसुभ्यां सहितः चन्द्रमा इव शोभनः ॥ २५ ॥

पश्चाद्राज्ञः परिकरः पृष्ठतस्सर्वतोऽभितः ।
महाजिनाः परीवारा इति कोलाहलाकुलाः ॥ २६ ॥

पुरप्रवेशयात्रा सा प्रातिष्ठत महोपमा ।
पूर्वाह्णे सायमुद्वाहाज्ज्यामातुः स्वागतायं या ॥ २७ ॥

यात्रा, सा चेयमेवासीदग्रजान्वयशंतमा ।
ब्रालुस्वामिन आवासः कल्पितो या महीभुजा ॥ २८ ॥

तत्रैवानीय मुत्तुस्वाम्यध्वरी च प्रतिष्ठितः ।
श्वः प्रभातेऽनुजोद्वाहमाङ्गल्ये विनिवर्तिते ॥ २९ ॥

सौजन्यौदार्यरासिक्यान् ध्यायं ध्यायं महीपतेः ।
गुणान् संप्रीयमाणस्य शिष्यवद्राज्ञि वत्सलः ॥ ३० ॥

तेन राज्ञा सह स्थातुं स्वं संकल्पं निवेदयन् ।
रागेण मेघरञ्जन्या मुत्तुस्वामिमखी जगौ ॥ ३१ ॥

" वेङ्कटेश्वरमेङ्प्पभूपालमहमाश्रये ।
विद्वज्जनानां कल्पद्रुं कार्तिकेयकृपास्पदम् ॥ ३२ ॥

संरञ्जितबहुक्षेत्रमि"ति द्व्यर्थकृतं कृतिम् ।
साक्षाच्छ्रीवेङ्कटेशेन ' ना विष्णुः पृथिवीपतिः ' ।
इति स्मृतिं स्मारयन्तीं कुर्वतीं भूभुजोऽन्वयम् ॥ ३३ ॥

गीतोत्तमं तदेङ्प्पो मन्वानो गुर्वनुग्रहम् ।
प्रत्यगृह्णात् स्वशिरसा गीतस्वारस्यकम्पिना ॥ ३४ ॥

तथा यज्ञशिरोवृष्टकाञ्चनाञ्जलिपाणिना ।
" बालुस्वाम्येक एवायमधुना मम वर्तते ॥ ३५ ॥

तमेव पुत्रकं मन्ये तत्पुनर्योगदायिना ।
त्वया नोपकृतं किं वा किं वास्त्यत्र च मेऽधुना ॥ ३६ ॥

अपि चास्मिन् प्रदेशे हि तीर्थक्षेत्राणि यानि च ।
तानि मे सेवितव्यानि तत्रत्या देवता अपि ॥ ३७ ॥

स्तुत्वा पावयितव्या मे गीतसाहित्यवैदुषी " ।
इत्थं गुरोर्गिरः श्रुत्वा नून्नराज्यागमादिव ॥ ३८ ॥

जहर्ष प्राह चोर्वीशः 'पूर्वमेव श्रुतं मया ।
अनुजादाग्रजं गीतं यशश्च विमलोज्ज्वलम् ॥ ३९ ॥

"किं भवान् स्तौति मे गीतं श्रोतव्यो ह्यग्रजो मम" ।
बालुस्वामिमुखादेवमभीक्ष्णं शृण्वतो मम ॥ ४० ॥

शुश्रूषा च दिदृक्षा च भूयसी भवतामभूत् ।
क्व चोलसीम क्व च वा सीम्नि क्षेत्राटने रताः ॥ ४१ ॥

स्युर्भवन्त इति प्राय आसं केवलमुत्सुकः ।
रामनाथप्रसादेन भ्रातृचुम्बकयोगतः ।
आकृष्टा यद्भवन्तोऽत्र स्वयं तद्भाग्यमुत्तमम् ॥ ४२ ॥

यथा हि भवतामेवं ममापि प्रष्ठदैवतम् ।
सुब्रह्मण्यो भवत्यत्र क्षेत्रं नस्तदधिष्ठितम् ॥ ४३ ॥

निकटे कङ्कशैलाख्यं यत्र तत्तन्मया कृतम् ।
मण्डपाश्च कुमाराख्य-तडागः सत्रमन्दिरम् ॥ ४४ ॥

द्वादशाप्यग्रहाराश्च तत्र गत्वावयोरिमम् ।
सख्यशेवधिलाभाख्यं फलं गुरुगुहाग्रतः ॥ ४५ ॥

कार्तिज्ञभावपुष्पेण भवद्भिश्च पुरस्कृतः ।
समर्पयितुमिच्छामि तत्र यावोऽचिराद्वयम् ॥ ४६ ॥

प्राप्ते विचित्रवैशाखमहे राज्ञा प्रवर्तिते ।
मुत्तुस्वामिमखी तेन सह कङ्काचलं गतः ॥ ४७ ॥

महता वैभवेनासन् क्रमास्ते ते महोत्सवे ।
पुरातने गुहागेहे तस्मिन्नेऽप्पपालिते ॥ ४८ ॥

विशिष्टपूजालङ्कारे सेवान्ते कृतसत्क्रियः ।
श्रीषण्मुखविलासाख्यमण्डपे राजनिर्मिते ॥ ४९ ॥

दीक्षितः प्रेक्षितस्सद्भैः भक्तैः राजपुरस्कृतैः ।
शुद्धधन्यासिरागेण शुद्धधन्यं गुहं जगौ ॥ ५० ॥

" सुब्रह्मण्येन नित्येन भोगमोक्षप्रदायिना ।
रक्षितोऽहमखण्डाष्टादशलोचनशोभिना ॥ ५१ ॥

प्रब्रवामादिपूज्येन कङ्कशैलविहारिणा ।
पुरन्दरमनोल्लासकरेनानन्दरूपिणा ॥ ५२ ॥

श्रीवल्लीदेवसेनाख्यशक्तिद्वयविलासिना ।
वेङ्कटेश्वरसंकल्पविशाखोत्सवतोषिणा ॥ ५३ ॥

श्रीमच्छुकरहस्योक्ततत्त्वमस्यादिरूपिणा " ।
इत्थं परपराकारौ ज्ञानभक्तिपथौ तथा ॥ ५४ ॥

अपूर्वरागसौभाग्यं कीर्तनेन विवृण्वता ।
भूभृद्गुरुः गुरुगुहमगायत्कृत्तिकासुतम् ॥ ५५ ॥

गुहभक्तेन तत्रापि मखितुल्येन तादृशा ।
अगच्छता कथं शक्यं स्थातुं तं स्थलमुत्तमम् ॥ ५६ ॥

तिरुच्चेन्दूरिति ख्यातं गन्धशैलाख्यया श्रुतम् ।
षट्सु प्राचीनषड्वक्त्रक्रीडापर्वतधामसु ॥ ५७ ॥

यस्मिन्नन्यतमे रम्ये महोदधितटस्थिते ।
असुरान् शूरपद्मादीन् देवसेनापतिर्भवन् ॥ ५८ ॥

कुमारः सञ्जहाराथ तत्र गत्वा स दीक्षितः ।
आराधयत्तोडिगीत्या षण्मुखं भास्करद्युतिम् ॥ ५९ ॥

"सुब्रह्मण्यः शक्तिधरः षडक्षरजपेडितः ।
भारतीशानयोर्दत्तगुह्यतत्त्वार्थबोधनः ।
शतायुर्दानमन्दारः प्रतापहततारकः ॥ ६० ॥

नववीरपरीवारः वासवाद्यभिवन्दितः ।
पत्रभूतिप्रदानेन भक्तभूतिप्रवर्धकः ॥ ६१ ॥

क्षितीशवेङ्कटेशादिपूज्यो रक्षतु मामि"ति ।
वेङ्कटेश्वरयेङ्प्पमहाराजस्ततोऽकरोत् ॥ ६२ ॥

कान्तिमत्यम्बिकोपेतशालिवाटीश्वरालये ।
अष्टबन्धनकुम्भाभिषेचनोत्सवमंद्भुतम् ॥ ६३ ॥

तदानीं सह राज्ञा स मुत्तुस्वामिमखीश्वरः ।
गतो देवं जगौ देवगान्धारिकृतिना कृती ॥ ६४ ॥

"शालिवाटीश्वरं शैलसुताकान्तिमतीरितम् ।
वालिसंपूजितग्रीष्ममहोत्सवमहं भजे" ॥ ६५ ॥

इति स्तुत्वेशमागम्य तद्देवीसन्निधिं जगौ ।
"श्रीमत्कान्तिमतीं शुद्धताम्रपर्णीतटस्थिताम् ॥ ६६ ॥

ह्रींङ्काराकारवदनां हिरण्यमणिमन्दिराम् ।
वन्देऽहमि"ति रागेण देशीसिंहरवेण सः ॥ ६७ ॥

"श्रीकान्तिमति मां पाहि शालिवाटीशनायिके" ।
इति गीतान्तरं चास्याः शङ्कराभरणे जगौ ॥ ६८ ॥

आलयान्तरमागम्य तत्रैव निकटस्थितम् ।
काम्भोजिरागबद्धेन कीर्तनेन जगौ शिवम् ।
"संरक्षितोऽहं कैलासनाथेने"त्यथ तत्सतीम् ॥ ६९ ॥

श्रीरञ्जन्या जगौ देवीं रञ्जयन् मञ्जुलश्रिया ।
"पाहि मां पार्वतेशानकुमारि परमेश्वरि ॥ ७० ॥

सर्वानन्दमये चक्रे स्थिते कामेशि कौलिनि ।
कञ्जलोचनि कन्दर्पजनकापाङ्गवीक्षिणि ॥ ७१ ॥

आवेशिनि कवीशान्तः काव्यालापविनोदिनि ।
शम्भुमोहिनि शर्वाणि शरच्चन्द्रप्रकाशिनि ॥ ७२ ॥

पाशमोचनि पाकारिपालिनि त्रिपुरार्दिनि ।
मन्दहासिनि कैवल्यप्रदायिनि गुहाम्बिके" ॥ ७३ ॥

इति प्रसिद्धललितामन्त्रस्तोत्रोक्तनामभिः ।
मननाङ्गतया मन्त्री निर्ममे निर्ममःकृतिम् ॥ ७४ ॥

कुरुचिं कल्लिडैपूर्वमग्रहारं ततो ययौ ।
लक्ष्मीवराहं तत्रस्थं गीतेनाभोगिना भजन् ॥ ७५ ॥

"भजेऽहं श्रीभूमिनीलास्तुतं श्रितशुभप्रदम् ।
कुबेरस्थापितं ताम्रपर्ण्या भङ्गहृतस्तटे ॥ ७६ ॥

मूर्त्यभेदरसस्यास्य सर्वत्राद्वैतदर्शिनः ।
कदाचिदुदियायेच्छाक्षेत्रवर्यं तदीक्षितुम् ॥ ७७ ॥

यत्रैकात्म्यं विवृणत श्रीनारायणशङ्करौ ।
तादृशैकाख्यया ख्यातं शंकुन्नारायणालयम् ७८ ॥

आसाद्योपास्यविविधसन्निधिष्वेतदालये ।
स नारायणदेशाक्षिरागेणापूर्वमञ्जुना ।
नारायणीप्रियं नारायणवच्छङ्करप्रियम् ॥ ७९ ॥

अनन्तशयनं पश्चात्पद्मनाभस्थलं ययौ ।
मार्ताण्डवर्मणा राज्ञा राज्यं यद्देवसात्कृतम् ॥ ८० ॥

नीताश्च निजवंशीयाः पद्मनाभस्य दासताम् ।
तदानीं तत्र राजाभूद् वञ्चिराजकुलाम्बुधौ ॥ ८१ ॥

रामवर्मेति सञ्जातः स्वात्यां सन्मौक्तिकं यथा ।
यं गर्भ एव राज्यश्रीर्वव्रे वरगुणोदयम् ॥ ८२ ॥

साहित्यसङ्गीतकलापारीणः स्वरवत्पटुः ।
गीतानि पद्मनाभाङ्कान्यकरोद् यः परः शतम् ॥ ८३ ॥

गाननाट्योपयोगीनि कृतिवर्णपदानि च ।
यत्सभायां सरोजिन्यामिव सारसषट्पदाः ।
कैरलाश्चोलदेशीया औत्तरापथिकास्तथा ॥ ८४ ॥

गाने नाट्ये च विविधे कृतभूरिपरिश्रमाः ।
वाग्गेयकारप्रमुखा नानाभाषाविशारदाः ॥ ८५ ॥

योन्नय्यादि च यत्ख्यातं तञ्जापुरमहालये ।
मुत्तुस्वामिमखींशानशिष्यभ्रातृचतुष्टयम् ॥ ८६ ॥

नाट्यागमाब्धिपारीण सम्प्रदायप्रवर्तकम् ।
विचित्रगुणवर्णादिसृष्टौ विधिवदीश्वरम् ॥ ८७ ॥

तत्तज्ज्ञापुरतः पश्चात् प्रेम्णानीय निजां सभाम् ।
योऽपालयन्महाराजः स्वयं भरतकोविदः ॥ ८८ ॥

कुलशेखरभूपस्स तदानीं दीक्षितागमे ।
बाल एवास बालेन्दुर्वर्धमानकलो यथा ॥ ८९ ॥

